खलणाइत्ति। अथवा, इति प्रकारान्तरद्योतने, प्रवृत्तौ=चिकीर्षितकार्यव्यापारे त्रिःकृत्वः=त्रीन् वारान् स्खलनायां=दुर्निमित्तादुपपाते सति विधिप्रयोगेऽपि= दुर्निमित्तादिप्रतिबन्धकविहितकार्याराधनेऽपि, तद्विधानं चैवम्—प्रथमस्खलनायामष्टोच्छ्वासमानः कायोत्सर्गो द्वितीयायां तदूद्विगुणः तृतीयायां सङ्घाटकज्येष्ठस्य पश्चात्करणमित्यादि विधिप्रयोगे पुनः पुनः स्खलनैव (प्रायः) न भवतीत्यपिशब्दार्थः। तथा सति प्रतिपृच्छा कार्येत्युत्तरगाथातोऽनुषङ्गः। अथ कथं विधिप्रयोगेऽपि स्खलना ? किं वा तस्यां सत्यां प्रतिपृच्छया ? इति चेत् ?, तथाविधविघ्नक्षयं

કાર્ય કરશે એવું કહે, (૫) અથવા કોઇએ એ કાર્ય કરી લીધું છે એવું જણાવે..., (૬) 'આદિ' શબ્દથી—એ જ કાર્યની બીજી કોઈ વિશેષ વાત જણાવે... આ બધાની જિજ્ઞાસાથી પ્રતિપૃચ્છા થતી હોવાથી તે ઉચિત છે.

શંકા– આવી જિજ્ઞાસા વિના પણ, ગુરુએ પૂર્વે કરેલ ઉપદેશનું પાલન કરવાથી જ ઈષ્ટસિદ્ધિ તો થઈ જવાની છે. તો પ્રતિપૃચ્છાની શી જરૂર છે ?

સમાધાન– ગુરુએ કાર્ય ફરમાવ્યા પછી કેટલોક કાળ પસાર થઇ ગયો હોય તો, દેશકાળાદિની પરિસ્થિતિ બદલાઈ ગઇ હોવાથી હવે ગુરુને એ કાર્યનું પ્રયોજન છે કે નહિ ? ઇત્યાદિ જાણવા માટે પ્રતિપૃચ્છા કરવી આવશ્યક બને છે. તેથી એ ન કરવામાં વિશેષ નુકશાન થાય છે. ॥૫૧॥ પ્રતિપૃચ્છાની જ બીજા પ્રકારે પ્રરૂપણા કરવા ગ્રન્થકાર કહે છે–

ઇચ્છિત કાર્યની શરૂઆતમાં અપશુકન વગેરે રૂપ સ્ખલના થએ છતે તે અપશુકનને દૂર કરનાર વિધિ કરવા છતાં (ઉત્તરોત્તર ત્રણવાર સ્ખલના અને વિધિ કરવાં છતાં) ફરી ફરી સ્ખલના થાય ત્યારે પ્રતિપૃચ્છા કરવી. દુર્નિમિત્તાદિને દૂર કરનાર વિધિ નીચે પ્રમાણે જાણવો– પહેલી વાર સ્ખલના થાય ત્યારે આઠ શ્વાસોશ્વાસ પ્રમાણ (એક નવકારનો) કાઉસ્સગ્ગ કરવો. બીજીવાર અપશુકન થાય તો એના કરતાં બમણો કાઉસ્સગ્ગ કરવો. ત્રીજીવાર થાય તો રત્નાધિક સંઘાટકે પાછળ રહેવું. (અર્થાત્ કાર્ય માટે પહેલી, બીજી અને ત્રીજી વાર ઉપાશ્રયાદિની બહાર નીકળતી વખતે રત્નાધિક આગળ ચાલતા હતા અને અવમરાત્નિક પાછળ ચાલતા હતા. પણ હવે ચોથી વાર

प्रति विधिप्रयोगहेतुत्वस्याऽल्पीयसस्तस्यबहुतरविघ्नपरिक्षयाऽशक्तत्वेऽप्यनपायात्, न खलु जलकणिकामात्रस्य ज्वलनज्वालाविध्यापनाऽक्षमत्वेऽपि धाराधरविमुक्तनीरधारायास्तत्र तथात्वम्, इति विधिप्रयोगेऽपि स्खलनायां विघ्नबाहुल्यकल्पनात्। दुर्निमित्तोपनिपातस्तु तज्ज्ञापकोऽदृष्टवशादेवोपतिष्ठते, पुण्यवत एवाऽनिष्टज्ञानेनानिष्टप्रवृत्तिप्रतिरोधसंभवात्। यत्तु दुर्निमित्तस्यापि विघ्नकारकत्वेन कारणोच्छेदद्वारा विधिप्रयोगस्य विघ्नक्षयहेतुत्वमिति तन्न, तस्य निषिद्धकर्मत्वाभावेन पापाऽहेतुत्वात्।

प्रतिपृच्छायां तु गुरुरुत्तरविघ्नाभावज्ञानेन प्रतिप्रच्छकं तत्र प्रवर्त्तयेत्, पुनः शकुनादिशुद्धौ वा तत्र प्रवर्तेथा इत्युपदिशेत्, तथा च शकुनादिशुद्धौ पुनरपि तत्र प्रवृत्तिरुचिता। एतेन त्रिवारस्खलनायां न तत्प्रवृत्तिरित्यपोदितं भवति। तदिदमाह--[पंचा० १२/३२]

[1]अहवावि पयट्टस्सा तिवारखलणाइ विहिपओगे वि। पडिपुच्छणत्ति णेया तहिं गमणं सउणसुद्धीए ॥ इति।

બહાર નીકળતી વખતે નાના સાધુ આગળ રહે અને રત્નાધિક પાછળ રહે.) 'વિધિપ્રયોગ કરવાથી પ્રાયઃ કરીને સ્ખલના થતી જ નથી' એવું 'અપિ' શબ્દ સૂચન કરે છે. આ રીતે ત્રણ વાર વિધિપ્રયોગ કરવા છતાં સ્ખલના થાય તો પ્રતિપૃચ્છા કરવી--આટલું ઉત્તર (? પૂર્વ) ગાથામાંથી સમજી લેવું.

શંકા– વિઘ્ન દૂર કરનાર વિધિ કરવા છતાં સ્ખલના કેમ થાય? અથવા તે થએ છતે પણ પ્રતિપૃચ્છાનું શું પ્રયોજન છે?

સમાધાન– વિધિપ્રયોગ વિઘ્નક્ષયનો હેતુ તો છે જ. પણ જેમ પાણીના બિંદુથી, ભડભડતો અગ્નિ ઓલવાતો ન હોવા છતાં મુશળધાર વરસાદથી તો તે ઓલવાતો જ હોવાથી પાણીમાં અગ્નિને ઓલવવાની હેતુતા તો મનાય જ છે. જ્યારે પાણીના બિન્દુ વગેરેથી અગ્નિ ઓલવવાનું કાર્ય થતું નથી ત્યારે પણ પાણીમાં અગ્નિ ઓલવવાની આ હેતુતા અખંડિત રાખવા, જેમ અગ્નિની પ્રબળતાને જ તે ન ઓલવવામાં જવાબદાર મનાય છે, કિંતુ પાણીમાં અગ્નિ ઓલવવાની કારણતા જ ન હોવાને નહિ. તેમ પ્રસ્તુતમાં પણ, જ્યારે વિધિપ્રયોગ કરવા છતાં વિઘ્નક્ષય થતો નથી ત્યારે પણ વિધિપ્રયોગમાં તેની કારણતા તો અખંડિત જ હોવી મનાય છે તેમ છતાં વિઘ્નક્ષય થતો નથી તેમાં વિઘ્નનું બાહુલ્ય જ જવાબદાર હોવાનું કલ્પી શકાય છે, વિધિપ્રયોગમાં વિઘ્નક્ષયની કારણતા જ ન હોવાને નહિ.

જે દુર્નિમિત્ત (અપશુકનાદિ) થાય છે તે પોતે કંઈ વિઘ્નરૂપ કે વિઘ્નના કારક હેતુરૂપ નથી કિન્તુ એતો માત્ર વિઘ્નોને જણાવનાર યાને સૂચક (જ્ઞાપક હેતુરૂપ) જ છે અને તે પણ તેવા પ્રકારના (શુભ) અદૃષ્ટવશાત્ જ ઉપસ્થિત થઇ જાય છે, વિઘ્નની હાજરી માત્રથી નહિ, કેમકે સંભવિત ભાવિ અનિષ્ટના સૂચક ચિન્હો પુણ્યશાળીને જ મળે છે જેના દ્વારા એ અનિષ્ટને જાણીને અનિષ્ટ પ્રવૃત્તિથી અટકીને અનિષ્ટથી બચી શકે છે. મંદ પુણ્યવાળા તો વિઘ્ન હોવા છતાં જ્ઞાપક હેતુ ન જણાવાથી તે અનિષ્ટ પ્રયોજક પ્રવૃત્તિથી નિવૃત્ત થતા જ નથી અને પરિણામે અનિષ્ટ

---

१ अथवाऽपि प्रवृत्तस्य त्रिवारस्खलनायां विधिप्रयोगेऽपि। प्रतिपृच्छेति ज्ञेया तत्र गमनं शकुनशुद्धौ ॥

अन्ये आचार्याः पूर्वनिषिद्धे=पूर्वं गुरुणा निवारिते कार्य इति शेषः, उपस्थितेऽव्यवहितसामग्रीके सति प्रतिपृच्छां ब्रुवते । पूर्वनिषेधवाक्येन जनितमनिष्टसाधनताज्ञानमपोद्योत्तरविधिवाक्यजन्येष्टसाधनताज्ञानद्वारा तयैव तत्रेच्छाप्रवृत्त्यादिक्रमेण प्रतिप्रच्छकस्य कार्यजननसंभवादिति । अथानुचितत्वज्ञानेन तदेव कार्यं निषेद्धा गुरुः कथं पुनस्तदेवानुजानीयाद् ? विरोधादिति चेत् ? न, एकत्रैव कार्ये उत्सर्गापवादाभ्यां विधिनिषेधसंभवात् । तदेवमाह—

[१]पुव्वणिसिद्धे अण्णे पडिपुच्छा किर उवट्ठिए कज्जे । एवं पि णत्थि दोसो उस्सग्गाईहिं धम्मठिई ॥

[पंचा० १२/३३] इति । निर्युक्तिकृताऽप्युक्तम्— "[२]पुव्वणिसिद्धंमि (? द्धेण) होइ पडिपुच्छा" [आव०नि०६९७] इति ॥५२॥

પામે છે. "દુર્નિમિત્તો પણ વિઘ્નના (અશુભ અદૃષ્ટના) કારકહેતુ જ છે અને વિધિપ્રયોગ તે દુર્નિમિત્ત રૂપ કારણોને દૂર કરવા દ્વારા જ વિઘ્નક્ષય કરે છે" એવું જે કોઇનું કથન છે તે યુક્ત નથી. કેમકે દુર્નિમિત્તો શાસ્ત્રનિષિદ્ધ અનુષ્ઠાનરૂપ ન હોવાના કારણે પાપના હેતુભૂત નથી અને તેથી વિઘ્નકારક હોવાનું માની શકાય નહિ.

પ્રતિપૃચ્છાની શી જરૂર છે? એવા બીજા પ્રશ્નનો જવાબ :- શિષ્ય ફરીથી પૂછે એટલે ગુરુ પોતાના જ્ઞાનથી હવે ભવિષ્યમાં વિઘ્નો છે કે નહિ એ જુએ છે. જો વિઘ્નોનો અભાવ જણાય તો શિષ્યને પ્રવર્ત્તાવે છે અને વિઘ્નાભાવને જાણી ન શકાય તો 'શુભ શુકન થાય ત્યારે ફરીથી પ્રવૃત્તિ કરજે' ઇત્યાદિ કહે છે. તેથી શુભશુકન થયા પછી પુનઃ પ્રવૃત્તિ કરવી ઉચિત બને છે, એટલે કે 'ત્રણવાર સ્ખલના થાય તો પછી પ્રવૃત્તિ ન કરવી' એવા નિયમનો આ અપવાદ જાણવો. કહ્યું છે કે "અથવા ઇચ્છિત કાર્ય કરવા જતાં સાધુને વિધિપ્રયોગ કરવા છતાં જો ત્રણવાર સ્ખલના થાય તો પ્રતિપૃચ્છા સામાચારીનો અવસર જાણવો. શુભશુકન થએ છતે ગમન કરવું." આમ પુનઃ પુનઃ થએલી સ્ખલનાથી પ્રતિબંધ પામેલ કાર્યની ઉત્પત્તિ માટે પ્રતિપૃચ્છા જરૂરી બને છે.

"જે કાર્યનો ગુરુએ પહેલાં નિષેધ કર્યો હોય તે સંપૂર્ણ સામગ્રીની હાજરી હોવા સાથે પુનઃ ઉપસ્થિત થાય તો તેની ગુરુ પાસે ફરીથી અનુજ્ઞા માંગવી એ પ્રતિપૃચ્છા છે" એવું કેટલાક આચાર્યો માને છે. પ્રતિપૃચ્છાના ઉત્તરરૂપે ગુરુએ કહેલ વિધિવાક્યથી, ગુરુએ પૂર્વે કહેલ નિષેધવાક્યથી 'આ મારું અનિષ્ટ કરનાર છે' એવું જે અનિષ્ટ સાધનતા જ્ઞાન થયું હતું તે દૂર થઈને ઇષ્ટસાધનતા જ્ઞાન થાય છે. આમ પ્રતિપૃચ્છાથી આ જ્ઞાન દ્વારા પછી ઇચ્છા-પ્રવૃત્તિ આદિના ક્રમે કાર્યોત્પત્તિ થાય છે. આ રીતે પણ કાર્યોત્પત્તિરૂપ પ્રયોજન સરતું હોઈ પ્રતિપૃચ્છા નિષ્ફળ નથી.

શંકા :-પહેલાં અનુચિત જાણીને જે કાર્યનો ગુરુએ નિષેધ કર્યો હતો તેની જ પછી અનુજ્ઞા શી રીતે આપે ? કેમકે અનુચિતત્વ અને ઉચિતત્વ પરસ્પર વિરુદ્ધ હોવાથી તે બેના કારણે થતા નિષેધ અને અનુજ્ઞા પણ પરસ્પર વિરુદ્ધ છે.

સમાધાન :-તમારી શંકા અયુક્ત છે કારણકે એક જ કાર્ય અંગે પણ ઉત્સર્ગ-

---

१ पूर्वनिषिद्धेऽन्ये प्रतिपृच्छा किलोपस्थिते कार्ये । एवमपि नास्ति दोष उत्सर्गादिभिः धर्मस्थितिः ॥

२ आपुच्छणा उ कज्जे पुव्वनिसिद्धेण होइ पडिपुच्छा । पुव्वगहिएण छंदण णिमंतणा होअगहिए णं ॥

अथ कथमप्यापृच्छोपदिष्टकार्याऽकरणे प्रतिपृच्छाऽवसरे तां विनैव तत्करणे प्रतिपृच्छाजन्यफलाऽभावेऽप्यापृच्छाजन्यं फलं कथं न भवति ? इत्यनुशासितुमाह—

इहयं आपुच्छा खलु पडिपुच्छाए करेइ उवयारं ।
फलमिट्ठं साहेउं णेव सतंतत्तणं वहइ ॥५३॥

(इहापृच्छा खलु प्रतिपृच्छायाः करोत्युपकारम् । फलमिष्टं साधयितुं नैव स्वतन्त्रत्वं वहति ॥५३॥

इहयं त्ति । इह=प्रतिपृच्छास्थले आपृच्छा प्रतिपृच्छायाः पूर्वोपकारं कुरुते, तां विना तदनुदयात् । इष्टं=अभिलषितं फलं=कार्यं साधयितुं=कर्त्तुं नैव स्वतन्त्रत्वं=स्वप्रधानतां वहति=बिभर्त्ति । न ह्यारब्धबहुक्रियात्मकप्रधानस्यैकक्रियामात्रकरणेऽपि फलसिद्धिः, अन्यथा प्रारब्धप्रतिक्रमणस्य चैत्यवन्दनैककायोत्सर्गमात्रकरणेऽपि फलसिद्धिप्रसङ्गात् । न चाऽऽपृच्छा तत्र प्रधानं, गौणभावाद्, उपदेशाऽविलम्बितकालसभ्रीचीनाया एव तस्या फलहेतुत्वादिति दिग् ॥५३॥

અપવાદને આશ્રીને વિધિ-નિષેધ સંભવી શકે છે. અર્થાત્ ઉત્સર્ગથી જે કાર્યનો નિષેધ કર્યો હોય તેની પણ અપવાદરૂપે અનુજ્ઞા સંભવે છે. શ્રી પંચાશકજીમાં આ જ વાત કહી છે કે– "પૂર્વે નિષિદ્ધ કરેલ કાર્ય કરવાનો અવસર પુનઃ પ્રાપ્ત થએ છતે 'પૂર્વે જેની ના પાડી છે તેની પણ કદાચ રજા આપી દે' એવી ઈચ્છા હોય તો પ્રતિપૃચ્છા કરવી. નિષિદ્ધની આ રીતે અનુજ્ઞા આપવામાં પણ કોઇ દોષ નથી, કેમકે ધર્મ ઉત્સર્ગ-અપવાદરૂપે ગોઠવાએલો છે." **નિર્યુક્તિકારે** પણ કહ્યું છે કે "પૂર્વે નિષેધ કરાએલ કાર્ય અંગે પ્રતિપૃચ્છા કરવી. ॥૫૨॥

[પ્રતિપૃચ્છાસ્થળે માત્ર આપૃચ્છાથી કાર્યસિદ્ધિ ન થાય]

આપૃચ્છા વખતે ઉપદેશાએલ કાર્ય કોઇક કારણે ન કરવામાં અને પછી પ્રતિપૃચ્છાના અવસરે પ્રતિપૃચ્છા કર્યા વગર જ તે કાર્ય કરવામાં પ્રતિપૃચ્છાજન્ય ફળ ભલે ન મળે, પણ આપૃચ્છાજન્ય ફળ કેમ મળતું નથી ? એ જણાવવા ગ્રન્થકાર કહે છે—

પ્રતિપૃચ્છાસ્થળે (પ્રતિપૃચ્છાના અવસરે) આપૃચ્છા, સ્વતંત્રસામાચારીરૂપ રહેતી નથી કિન્તુ પ્રતિપૃચ્છાનો જ પૂર્વ ઉપકાર કરીને ચરિતાર્થ થઇ જાય છે. અર્થાત્ આપૃચ્છા તો પ્રતિપૃચ્છાનો અવસર ઊભો થાય એવી ભૂમિકા જ ઊભી કરી આપે છે, કેમકે આપૃચ્છા વિના પ્રતિપૃચ્છા હોતી નથી. તેથી આપૃચ્છા પોતે ઇષ્ટકાર્યને સિદ્ધ કરવામાં સ્વતંત્ર=પ્રધાન=મુખ્ય કારણ બનતી નથી. વળી જ્યાં ઇષ્ટફળની સિદ્ધિ કરનાર મુખ્ય કારણરૂપ પ્રધાન, શરૂ કરેલ ઘણી ક્રિયાના સમુદાય રૂપ હોય (અર્થાત્ જ્યાં ઇષ્ટફળની સિદ્ધિ માટે ઘણી ક્રિયાઓ મુખ્યતયા વ્યાપૃત હોય) ત્યાં કોઇ એક ક્રિયા માત્ર કરવામાં ફળસિદ્ધિ થતી નથી. નહિતર તો શરૂ કરેલ પ્રતિક્રમણનું ચૈત્યવંદન-એક કાઉસ્સગ્ગ માત્ર કરવામાં પણ ફળ પ્રાપ્ત થઇ જાય. પ્રસ્તુતમાં પ્રતિપૃચ્છાસ્થળે પણ ઇષ્ટફળ સિદ્ધિ માટે પ્રતિપૃચ્છા જ પ્રધાન છે, આપૃચ્છા નહિ, કેમકે એ ગૌણ છે. તેથી પ્રતિપૃચ્છારૂપ પ્રધાન કારણની ગેરહાજરીમાં માત્ર આપૃચ્છારૂપ ગૌણકારણ શી રીતે ફળ પ્રાપ્તિ કરાવે ?

શંકા:-પ્રતિપૃચ્છાશૂન્ય આપૃચ્છા ફળનો હેતુ બનતી ન હોય તો આપૃચ્છા સામાચારી તો નિષ્ફળ જ બની જશે.

अथ निजहितकार्यनिवेदनात्मकापृच्छालक्षणाक्रान्तत्वात् प्रतिपृच्छाया आपृच्छातो न भेदः, विषयभेदमात्रेण भेदस्वीकारे त्वापृच्छानामप्यनन्तकार्यविषयिणीनामानन्त्यप्रसङ्गादिति परस्य विभ्रममपासितुमाह—

ण य एसा पुच्छ च्चिय उवाहिभेया य कज्जभेयवसा ।
अण्णह कहं ण पविसे इच्छाकारस्स कुच्छिंसि ॥५४॥ (मि)

(न चैषाऽऽपृच्छैव उपाधिभेदाच्च कार्यभेदवशात् । अन्यथा कथं न प्रविशेदिच्छाकारस्य कुक्षौ ॥ ५४ ॥)

॥ पडिपुच्छा सम्मत्ता ॥

ण य त्ति । न च= न पुनः एषा=प्रतिपृच्छाऽऽपृच्छैव कुतः ? उपाधिभेदात्= लक्षणभेदात् । व्यवह्रियते च स्वरूपाभेदेऽपि प्रमाणप्रमेययोरिव लक्षणभेदाद् भेदः । न चानयोर्विषयसाङ्कर्याल्लक्षणत्वमपसिद्धान्ताय—"जीवे भंते ! णेरइए णो णेरइए जीवे ? गोयमा ! जीवे सिया णेरइए सिया णो णेरइए, णेरइए पुण णियमा जीवे" इतिवदेकपदव्यभिचारिलक्षणत्वात् । 'अनयोरप्येवं सामान्यविशेषभाव एव प्राप्तः, तथा चानयोर्भेदप्रतिपादनं किंप्रयोजनम् ?' इत्यत आह—कार्यभेद-

---

સમાધાન :—ગુરુએ કાર્ય માટે કરેલા નિર્દેશ પછીના વિલંબ રહિત કાળથી સહકૃત આપૃચ્છા ફળ પ્રત્યે હેતુ છે. અર્થાત્ ગુરુએ અનુજ્ઞા આપ્યા પછી જ્યાં વિના વિલંબે કાર્ય થવાનું (કરવાનું) હોય ત્યાં કરવામાં આવેલ આપૃચ્છા ફળોત્પત્તિ કરે છે. પ્રતિપૃચ્છા સ્થળે અવિલંબિત કાળરૂપ સહકારી હાજર ન હોઈ આપૃચ્છાથી ફળોત્પત્તિ થતી નથી, જ્યારે આપૃચ્છાસ્થળે તે હાજર હોઇ ફળોત્પત્તિ થાય છે. ॥૫૩॥

શંકા :— સ્વહિતકાર્યનું નિવેદન કરવું એ આપૃચ્છા છે. પ્રતિપૃચ્છા પણ એવા નિવેદન રૂપ હોવાથી આપૃચ્છારૂપ જ છે, આપૃચ્છાથી જુદી નથી. 'આપૃચ્છાનો વિષય પૂર્વે જેનું નિવેદન કર્યું ન હોય તેવું અપૂર્વ કાર્ય જ છે જ્યારે પ્રતિપૃચ્છાનો વિષય પૂર્વનિવેદિત કાર્ય છે. આમ બન્નેના વિષય જુદા જુદા હોઇ એ બન્ને જુદી જુદી જ છે' એવું પણ કહેવું નહિ, કેમકે એમ માત્ર વિષયભેદના કારણે ભેદ માનવાનો હોય તો તો, આપૃચ્છાના વસ્ત્રસીવન, વસ્ત્રધોવન વગેરે કાર્યરૂપ જુદા જુદા અનંતા વિષયો હોવાથી આપૃચ્છાના પણ અનંતભેદ હોવાની આપત્તિ આવે.

સમાધાન :— આવા વિભ્રમનું નિવારણ કરવા ગ્રન્થકાર કહે છે—

આ પ્રતિપૃચ્છા 'આપૃચ્છા' રૂપ નથી, કેમકે આપૃચ્છા કરતાં ભિન્ન ઉપાધિ=લક્ષણવાળી છે. સ્વરૂપથી અભેદ હોવા છતાં લક્ષણના ભેદથી વસ્તુના ભેદનો વ્યાવહાર થાય છે. જેમકે પ્રમાણ અને પ્રમેયનો. " આપૃચ્છા અને પ્રતિપૃચ્છા નો વિષય સંકીર્ણ હોવાથી તે બેનું આવું પૃથક્ પૃથક્ લક્ષણ માનવું અપસિદ્ધાન્તરૂપ છે" એવું કહેવું નહિ, કેમકે આ બે એકપદવ્યભિચારી લક્ષણરૂપ છે. જેમકે "**પ્રશ્ન**— હે ભગવાન્ ! જીવ નારક હોય છે કે નહિ ? **ઉત્તર** :— હે ગૌતમ ! જીવ નારક હોય કે ન પણ હોય, પણ નારક તો અવશ્ય જીવ હોય છે" ઇત્યાદિ એકપદવ્યભિચારી લક્ષણરૂપ છે. અર્થાત્ એકપદવ્યભિચારી એવા પણ જીવ અને નારકનું શાસ્ત્રમાં કરેલ જુદું જુદું પ્રતિપાદન જેમ અપસિદ્ધાન્તરૂપ નથી તેમ આ બેનો પણ જુદો જુદો ઉપન્યાસ વગેરે અપસિદ્ધાન્તરૂપ નથી.

वशात्=विधिशिक्षादिकार्यान्तरज्ञानादिप्रयोजनभेदेन खल्वनयोर्भेदेनोपन्यास इति न किञ्चिदनुपपन्नम्। अन्यथा=उक्तगतिमन्तरेणेच्छाकारस्य कुक्षौ=स्वरूपे कथं न प्रविशेत्?=कुतो नान्तर्भवेदेषेत्यनुषङ्गः। 'इदं भदन्तोपदिष्टं कार्यमहमिच्छया करोमि, परं शकुनादिस्खलना प्रतिषेधतीति हि प्रतिपृच्छा, सा चेच्छाकारलक्षणाक्रान्तैवेत्युपधेयसाङ्कर्येऽप्युपाध्योरसाङ्कर्यमेवात्र समाधानम्, तच्चान्यत्रापि समानमिति भावः ॥५४॥

॥ इति न्यायविशारदविरचिते सामाचारीप्रकरणे प्रतिपृच्छा समाप्ताऽर्थतः ॥७॥

इयाणिं छंदणा भन्नइ–

इदानीमवसरप्राप्ततया छन्दना निरूप्यते, तत्रादौ तल्लक्षणमाह—

गुरुआणाइ जहरिहं दाणं साहूण पुव्वगहिअस्स ।
छंदणसामायारी विसेसविसया मुणेयव्वा ॥५५॥

(गुर्वाज्ञया यथार्हं दानं साधूनां पूर्वगृहीतस्य । छंदनासामाचारी विशेषविषया मुणितव्या ॥ ५५ ॥)

गुरुआणाइ त्ति । **पूर्वगृहीतस्य**=पूर्वानीतस्याऽशनादेः **गुर्वाज्ञया**=रत्नाधिकादेशेन **यथार्हं**=बालग्लानादियोग्यतानतिक्रमेण **साधूनां**=यतीनां दानं दीयतेऽनेनेति व्युत्पत्त्या ग्रहणनिमन्त्रणं छन्दना **सामाचारी** भवति। तेनागृहीतस्य[1] [2]गृहीतस्यापि गुर्वाज्ञां विना वा[3] व्यत्ययेन निमन्त्रणायां,[4] [5]दानमात्रे वा नातिव्याप्तिः। इयं च वक्ष्यमाणरीत्या **विशेषविषया मुणितव्या**, न साधुसामान्यविषया ॥५५॥ विशेषविषयत्वमेव स्पष्टयति—

શંકા – એકપદવ્યભિચારી વસ્તુઓ પરસ્પર સામાન્ય વિશેષ ભાવવાળી હોય છે (અર્થાત્ એક સામાન્ય હોય છે અને બીજી એના જ કોઈ એક વિશેષપ્રકાર રૂપ હોય છે) પણ તે બેમાં ભેદ હોતો નથી; જેમકે જીવ અને નારક. તેથી આપૃચ્છા અને પ્રતિપૃચ્છા વચ્ચે પણ સામાન્ય–વિશેષ ભાવ જ છે, ભેદ નહિ. માટે આ બેનું જુદી જુદી સામાચારી રૂપે પ્રતિપાદન કરવાની શી જરૂર છે?

સમાધાન – આ બન્નેના વિધિશિક્ષાદિ અને કાર્યાન્તરજ્ઞાનાદિરૂપ કાર્ય જુદા જુદા હોવાથી એ બેનો જુદી જુદી હોવા રૂપે ઉપન્યાસ કર્યો છે. તેથી કોઈ અયુક્તતા નથી. નહિતર તો એ ઇચ્છાકાર સામાચારીમાં પણ અંતર્ગત શા માટે ન થઇ જાય? કેમકે 'આપે જણાવેલ કાર્યને હું ઇચ્છાપૂર્વક કરું છું, પણ અપશુકનો મને તે કરતાં અટકાવે છે.' આવું કથન કરવું એ પ્રતિપૃચ્છા છે, જેમાં ઇચ્છાકારનું લક્ષણ પણ ગએલું જ છે. છતાં ઇચ્છાકાર અને પ્રતિપૃચ્છાના લક્ષણ ભિન્ન ભિન્ન જ મનાય છે તેમજ એ માન્યતાને સંગત બનાવવા 'ઉપધેયનું સાંકર્ય હોય તો પણ ઉપાધિનું અસાંકર્ય સંભવિત છે' એવું સમાધાન કરવું જ પડે છે. તો એ જ રીતે આપૃચ્છા–પ્રતિપૃચ્છા અંગે પણ એ સમાધાન સુકર છે. અર્થાત્ એ બેનો વિષય સંકીર્ણ હોવા છતાં એ બેના લક્ષણમાં અસાંકર્ય સંભવિત હોઇ એ બંને સ્વતંત્ર લક્ષણ રૂપ હોવામાં અપસિદ્ધાન્ત નથી. ॥૫૪॥

॥ ન્યાયવિશારદવિરચિત સામાચારી પ્રકરણમાં પ્રતિપૃચ્છાની અર્થપ્રરૂપણા પૂર્ણ થઈ. ॥૭॥

एसा जमत्तलद्धियविसिट्ठतवकारगाइजइजुग्गा ।
अहियगहणं च तेसिं अणुग्गहट्ठं अणुण्णायं ॥५६॥

(एषा यदात्मलब्धिकविशिष्टतपःकारकादियतियोग्या । अधिकग्रहणं च तेषामनुग्रहार्थमनुज्ञातम् ॥ ५६ ॥)

एसा त्ति । एषा=छन्दना यत्=यस्मात् कारणात् आत्मनैव=स्वार्जितलाभान्तरायकर्मक्षयोपशमेप्ये(? नै)व, न तु परसाहाय्यादिना लब्धिः=भक्तादिलाभो यस्यासावात्मलब्धिकः, आत्ता=स्वीकृता लब्धिर्भक्तादिप्राप्त्यनुकूला शक्तिर्येन स आत्तलब्धिको वा, आप्ता=प्राप्ता लब्धिर्येन स आप्तलब्धिको वा, तथा विशिष्टमष्टमादितपः करोतीति विशिष्टतपःकारकस्तौ आदिर्येषां, ते च ते यतयश्च, तेषां योग्या=उचिता । अयं भावः- य आत्मलब्धिसंपन्नो विशिष्टतपस्वी वा पारणे मण्डल्या बहिर्भोजनकारी तस्यैतदौचित्यम् । इतरेषां तु यतीनां मण्डलीभोग एकभक्तं च नियमेनैवेति पूर्वगृहीतभक्ताद्यभावान्निर्विषया छन्दना । तदिदमुक्तम्—

[છંદના સામાચારીનું લક્ષણ]

હવે અવસરપ્રાપ્ત છંદનાની પ્રરૂપણા કરાય છે એમાં સૌ પ્રથમ એનું લક્ષણ કહેવાય છે—

પહેલાં લઈ આવેલ આશનપાનાદિ રત્નાધિકના આદેશને અનુસરીને બાળ-ગ્લાનાદિનું ઉલ્લંઘન ન થાય એ રીતે સાધુઓને, તેઓ એ ગ્રહણ કરે એ માટેના જે નિમંત્રણથી અપાય છે તે છંદનાસામાચારી છે. આ સામાચારીનું લક્ષણ આવું હોવાથી નીચેની અતિવ્યાપ્તિઓ આવતી નથી. [1]અગૃહીત અશનાદિના નિમંત્રણમાં, [2]ગૃહીત અશનાદિના ગુર્વાજ્ઞાવિના જ બાળગ્લાનાદિ ક્રમનો વિપર્યાસ કરીને કરાતા નિમંત્રણમાં, અને [3]નિમંત્રણા કર્યા વિના જ દાન કરવા માત્રમાં. આ સામાચારી નીચે જણાવેલ રીતે અમુક વિશેષ સાધુઓને જ હોય છે દરેક સાધુઓને નહિ તે જાણવું. ॥ ૫૫ ॥ આજ વાતને સ્પષ્ટ કરતાં ગ્રન્થકાર કહે છે—

આ સામાચારી આત્મલબ્ધિક વિશિષ્ટ તપકારક વગેરે સાધુઓને હોય છે, કેમકે અનુગ્રહ=નિર્જરા માટે તેઓને જ અશનાદિનું અધિક ગ્રહણ અનુજ્ઞાત છે. અહીં શ્લોકમાં 'अत्तलद्धिय' શબ્દ છે એની નીચે મુજબ ત્રણ પ્રકારે વ્યાખ્યા જાણવી–

જેણે આત્માથીજ=સ્વોપાર્જિતલાભાંતરાયકર્મક્ષયોપશમથી જ અશનાદિનો લાભ થતો હોય, બીજાની સહાય વગેરેથી નહિ તે આત્મલબ્ધિક. અથવા (આત્તા=સ્વીકૃત કરાએલ) જેનાથી ભોજનાદિની પ્રાપ્તિ થાય તેવી શક્તિ રૂપ લબ્ધિ જેના વડે સ્વીકૃત કરાઇ છે તે આત્તલબ્ધિક. અથવા જેણે એવી લબ્ધિ આપ્ત=પ્રાપ્ત કરી છે તે આપ્તલબ્ધિક.

વિશિષ્ટ તપકારક એટલે અઠ્ઠમ વગેરે તપકરનાર મહાત્મા. આવા આત્મલબ્ધિ સંપન્ન કે વિશિષ્ટ તપસ્વી મહાત્મા પારણે માંડલી બહાર ભોજન કરતા હોય છે તેમજ આવશ્યકતા મુજબ સવાર-બપોર વગેરે કાળે બે-ત્રણ વગેરે વાર પણ ભિક્ષા માટે જતાં હોય છે. તેથી તેઓને પૂર્વગૃહીત અશનાદિ સંભવિત હોઇ આ સામાચારી હોય છે. બીજા સાધુઓને તો અવશ્ય માંડલીમાં એક જ વાર ભોજન કરવાનું હોઇ પૂર્વગૃહીત અશનાદિ હોતા જ નથી. માટે તેઓને છંદના સામાચારી હોતી નથી.

जो अत्तलद्धिगो खलु विसिट्ठखवगो व पारणाइत्तो । इहरा मंडलिभोगो जईण तह एगभत्तं च ॥ १ ॥ [पंचा० १२/३५] इति । नन्वात्मलब्धिकादेरप्यात्मोदरपूर्त्तिमात्रोपयोग्येव भक्तादिकं गृह्णतोऽधिकभक्ताद्यभावात्कथं छन्दनासंभवः ? इत्यत आह–तेषां=आत्मलब्धिकविशिष्टतपःकारकादीनां अधिकग्रहणं=स्वप्रमाणातिरिक्तभक्ताद्यानयनं चः पुनरर्थे अनुग्रहार्थं=बालग्लानादीनां प्रदानेन निर्जरार्थं अनुज्ञातं=अनुमतं तीर्थकरगणधरैरिति शेषः । तदुक्तम्—[२]नाणादुवग्गहे सइ अहिगे गहणं इम्मस्सऽणुण्णायं । [पंचा० १२/३६] इति ॥ ५६ ॥

ननुच्छन्दकेनाधिकभक्तपानाद्यानयने छन्देन च केनापि कारणेन तदग्रहणे फलाभावादन्तर्गडुश्छन्दना इत्यत आह—

आणासुद्धो भावो देइ बहुं णिज्जरं ण गहणं वि ।
असणागहणे वि तओ फलसिद्धी छंदगस्स हवे ॥ ५७ ॥

(आज्ञाशुद्धो भावो ददाति बहुःनिर्जरां न ग्रहणमपि । अशनाऽग्रहणेऽपि ततः फलसिद्धिश्छंदकस्य भवेत् ।५७।

કહ્યું છે કે—"જે આત્મલબ્ધિક હોય અથવા વિશિષ્ટ તપસ્વી પારણું કરનાર હોય તેણે છંદના આચરવાની હોય છે. આ સિવાયના સાધુઓને માંડલી ભોજન અને એકાસણું હોવાના કારણે અશનાદિનું પૂર્વગ્રહણ સંભવિત ન હોઈ છંદના શેની કરે ?"

શંકા :– આત્મલબ્ધિક વગેરે સાધુઓ પણ પોતાના પેટ પૂરતો આહાર જ ગ્રહણ કરે છે. તેથી તેઓ પાસે પણ વધારે આહારાદિ ન હોઈ છંદના શી રીતે સંભવે ?

સમાધાન :– આત્મલબ્ધિક–વિશિષ્ટ તપસ્વી વગેરે સાધુઓને બાળ–ગ્લાન વગેરેને અનુકૂળ આહારાદિ આપવા દ્વારા નિર્જરા કરવા રૂપ સ્વાનુગ્રહ માટે અધિક આહાર ગ્રહણ કરવાની શ્રી તીર્થંકર–ગણધરોએ અનુજ્ઞા આપી છે. કહ્યું છે કે—"આત્મલબ્ધિકાદિને અધિક અશનાદિ લાવવાની અનુજ્ઞા અપાયેલી છે જે એનાથી જ્ઞાનાદિગુણોને ટેકો મળે એમ હોય" તેથી તેઓને છંદના અસંભવિત નથી. ॥ ૫૬ ॥

"છંદક મહાત્માએ અધિક ભક્તપાનાદિ લાવીને છંદના કરી, પણ જેને નિમંત્રણ અપાયું તે છંદ્ય મહાત્માએ જો કોઈપણ કારણસર એ ભક્તપાનાદિ લીધા નહિ તો છંદકને પણ કોઈ ફળ મળે નહિ. તેથી તેની છંદના નિષ્ફળ થાય છે" એવી શંકાને ઉદ્દેશીને ગ્રન્થકાર કહે છે—

[આજ્ઞા શુદ્ધભાવ વિપુલનિર્જરા સાધક]

આજ્ઞાશુદ્ધ ભાવ જ વિપુલનિર્જરા કરાવે છે, ગ્રહણ કરે તો જ નિર્જરા એમ નહિ. તેથી છંદ્ય મુનિ અશનાદિનું ગ્રહણ ન કરે તો પણ છંદક મુનિને ફળપ્રાપ્તિ થાય જ છે. છંદ્યને આમંત્રણ આપવાનો ભાવ ભગવાન ના ઉપદેશના યથાર્થ પાલનથી ઉત્પન્ન થએલો હોઈ પ્રશસ્ત બનતો જાય છે. પ્રશસ્ત બનતો આ ભાવ જ (ઈતર એટલે કે ગ્રહણ નહિ, કારણકે એનો તો ફળજનક તરીકે આગળ નિષેધ કરાવાનો છે,) પોતાના ચઢિયાતાપણાને અનુસરતા ચઢિયાતાપણાવાળી વિશિષ્ટ કર્મનિર્જરા રૂપ ફળ આપે છે.

---

૧. य आत्मलब्धिकः खलु विशिष्टक्षपको वा पारणादिकतः । इतरथा मंडलिभोगो यतीनां तथैकभक्तं च ॥

૨ अस्योत्तरार्धः–दोण्ह वि इट्ठफलं तं अतिगंभीराण धीराण ॥ ज्ञानाद्युपग्रहे सदाऽधिके ग्रहणमस्यानुज्ञातम् ।

आणासुद्धो त्ति। **आज्ञाशुद्धो**=यथावद्भगवदुपदेशपालनप्रभवतया प्रशस्ततामासादयन् **भावः**=अध्यवसाय इतरस्य निषेत्स्यमानत्वात् स एव **बहवीं**[1] स्वातिशयानुविहितातिशयां **निर्जरां**=कर्महानिं **ददाति**=प्रयच्छति, न ग्रहणमपि। छन्दनाजन्यनिर्जरायां भावविशेष एव हेतुः, न तु तत्र च्छन्द्यग्रहणमपि सहकारी,तदन्तराऽपि फलभावात्। न च तत्र भावपूर्वकदानमेव विधिबोधितकारणताकमित्यग्रहणे[3] तदभावात् कथं फलोदयः? इति वाच्यम्,[4] विशिष्टविधेर्विशेष्ये बाधकावतारे विशेषणमात्र एव पर्यवसानमिति निश्चयनयतात्पर्याद्विशेषणहेतुत्वावश्यकत्वेनैवोपपत्तौ विशिष्टहेतुत्वकल्पनाऽनौचित्याद्विशिष्टस्य फलदेशनिष्ठसंबन्धाऽभावाच्च। न चाऽसंबद्धस्य कार्यजनकत्वं नाम, अतिप्रसङ्गात्, तत्त्वमत्रत्यमस्मत्कृताध्यात्ममतपरीक्षाद्रव्यालोकादावसेयम्। **ततः**=आज्ञाशुद्धभावस्यैव विपुलनिर्जराहेतुत्वात् **अशनस्य**=भक्तस्योपलक्षणात् **पानादेरग्रहणेऽपि**= अस्वीकारेऽपि छन्द्येनेति शेषः, **छन्दकस्य**=पूर्वगृहीताशनादिनिमन्त्रणाकृतः **फलसिद्धिः**=निर्जराविशेषसंपत्तिर्भवेत्। अत एव 'ग्रहणाग्रहणे निर्जरां बन्धं प्रति च हेतू भवत' इत्यनियम एव, भावविशेषस्यैव नियामकत्वात्। तदिदमाह–[पंचा० १२/३७]

गहणे वि णिज्जरा खलु अग्गहणे वि य दुहावि बंधो अ।
भावो एत्थ णिमित्तं आणासुद्धो असुद्धो अ ॥ इति ॥६७॥

નહીં કે છંદક દ્વારા થતું ગ્રહણ પણ. અર્થાત્ છંદનાથી થનાર નિર્જરા પ્રત્યે છંદકનો ભાવવિશેષ જ હેતુ છે, છંદ્યે કરેલ સ્વીકાર એનો સહકારી છે એવું નથી, કેમકે એના વિના પણ ફળપ્રાપ્તિ થાય છે.

શંકા :– "છંદના સામાચારીના પાલન માટે પૂર્વગૃહીત અશનાદિનું નિમંત્રણપૂર્વક દાન કરવું" એવું વિધાન છે. આવું વિધાન ભાવપૂર્વકના (નિમંત્રણાપૂર્વકના) દાનને જ વિધિપાલનજન્યફળના કારણ તરીકે જણાવે છે. છંદ્ય સાધુ એ અશનાદિનો સ્વીકાર ન કરે તો દાનનો અભાવ રહેતો હોઈ ફળોત્પત્તિ શી રીતે થાય?

સમાધાન :– 'ભાવપૂર્વક દાન કરવું' ઈત્યાદિરૂપ વિશિષ્ટવિધિઓમાં જ્યાં વિધિનો અન્વય વિશેષ્યમાં બાધિત હોય ત્યાં તે માત્ર વિશેષણમાંજ અન્વિત હોવાનું ફલિત થાય છે. જેમકે ગૃહસ્થોને 'ઉચિતવિવાહ'ના કરેલ વિધાનમાં, વિવાહનું વિધાન બ્રહ્મચારી સાધુઓએ કરવું અસંભવિત હોઈ માત્ર ઔચિત્યનું જ વિધાન ફલિત થાય છે. આવા નિશ્ચયનયના તાત્પર્ય મુજબ વિશેષણમાં હેતુતા માનવી આવશ્યક હોઈ વિશિષ્ટમાં હેતુતા માનવી ઉચિત નથી. તેથી ફળ પ્રત્યે ભાવવિશિષ્ટ દાન નહિ, પણ ભાવ જ હેતુ છે, વળી કાર્ય અને કારણ સમાનાધિકરણ હોય છે એટલે કે ફળ જ્યાં રહ્યું હોય ત્યાં કારણનો પણ સંબંધ હોવો આવશ્યક છે. પ્રસ્તુતમાં કર્મનિર્જરારૂપ ફળ જ્યાં (છંદકના આત્મામાં) રહ્યું છે ત્યાં ભાવપૂર્વક દાનરૂપ વિશિષ્ટનો સંબંધ ન હોવાથી તેને કારણ માનવું યુક્ત નથી. માટે ભાવાત્મક વિશેષતાને જ ફળ પ્રત્યે કારણ માનવું યુક્ત છે. કાર્યના અધિકરણમાં અસંબદ્ધ એવા પણ ભાવપૂર્વકના દાન રૂપ વિશિષ્ટને જ જો કાર્યજનક માનવાનું હોય તો તો લંકામાં રહેલ દંડ અયોધ્યામાં ઉત્પન્ન થતા

---

१ ग्रहणेऽपि निर्जरा खल्वग्रहणेऽपि च द्विधापि बंधश्च। भावोऽत्र निमित्तमाज्ञाशुद्धोऽशुद्धश्च ॥

नन्वशनादिदानस्य न फलाऽहेतुत्वं, स्वजन्यभावावेशषसबन्धेन फलसामानाधिकरण्यन तस्य हेतुत्वसंभव इति व्यवहारनयसूक्ष्मेक्षिकाकरणात् । तथा च स्वगृहीताशनस्य च्छन्द्येनाऽग्रहणे तस्य ग्रहणजन्यफलाभावः, छन्दकस्य च दानजन्यफलाभाव इत्याशङ्कामपाकर्त्तुमाह—

जइ वि हु ण दाणगहणप्पभवं सुकडाणुमोअणं तत्थ ।
तह वि तयं विहिपालणसमुब्भवं होइ णियमेणं ॥ ५८ ॥

(यद्यपि खलु न दानग्रहणप्रभवं सुकृतानुमोदनं तत्र । तथापि तकं विधिपालनसमुद्भवं भवति नियमेन ॥५८॥

जइ वि हु त्ति । यद्यपि हुः वाक्यालङ्कारे, तत्र=अग्रहणस्थले दानग्रहणप्रभवं सुकृतानुमोदनं न भवति। "सुष्ठु मया दत्तमस्मै महात्मने, इदमेव चासारस्य शरीरस्य संसारे शक्तिफलं यदेतादृशानां महात्मनां प्रत्युपकारानीहया वैयावृत्त्यकरणमि"ति दातुर्दानादेव सुकृतानुमोदनाध्यवसायः समुल्लसति, अन्यथा तु ' अहो ! कष्टमात्रं मया कृतं न तु फलवज्जातम् ' इति दीनतया तत्कुण्ठनमेव स्यादिति । एवं ग्रहीतुरपि ग्रहण एव "सुष्ठु महात्माऽसावदीनमना निर्जरार्थी परार्थं प्रयतते, सुष्ठु च ममाप्येतदृत्ताशनादिग्रहणम्, इयताऽप्यस्य

ઘટકાર્ય પ્રત્યે હેતુ બની જવા વગેરે રૂપ અતિપ્રસંગ આવે. આ અંગેનું વિશેષ રહસ્ય અમારા **અધ્યાત્મમત પરીક્ષા–દ્રવ્યાલોક** વગેરે ગ્રન્થોમાંથી જોઈ લેવું. સારાંશ, પૂર્વગૃહીતની નિમંત્રણા કરવાનો આગ્રહ શુદ્ધભાવ જ વિપુલનિર્જરાનો હેતુ હોઈ, અશન–પાનાદિનો છન્દ્ય દ્વારા સ્વીકાર ન થાય તો પણ, છંદકને વિશિષ્ટ કર્મનિર્જરા રૂપ ફળની પ્રાપ્તિ થાય જ છે. તેથી જ "ગ્રહણ કે અગ્રહણ નિર્જરા કે બંધ પ્રત્યે હેતુ બને છે" એવો નિયમ છે જ નહિ, કારણકે બંધ કે નિર્જરા પ્રત્યે ભાવવિશેષ જ નિયામક છે. કહ્યું છે કે "અન્ય મહાત્માને આપવા માટે અધિક અશનાદિ લઈ આવવા માત્રમાં પણ, તેમજ છંદ્યગ્રહણ ન કરે તેમાં પણ છંદકાદિને નિર્જરા તેમજ પુણ્યબંધ થાય જ છે, કેમકે નિર્જરા [ઉપલક્ષણથી પુણ્યબંધ] પ્રત્યે આજ્ઞાશુદ્ધભાવ અને પાપબંધ પ્રત્યે આજ્ઞાઅશુદ્ધ ભાવ જ હેતુ છે, ગ્રહણ–અગ્રહણ નહિ" ॥ ૫૭ ॥

"અશનાદિદાનનો ફળદેશમાં (છંદક આત્મામાં) સંબંધ ન હોવાથી દાનમાં હેતુતા સંભવતી નથી" એવું જે કહ્યું તે યુક્ત નથી, કેમકે વ્યવહારનયાનુસારે સૂક્ષ્મદૃષ્ટિએ વિચાર કરતાં જણાય છે કે સ્વ(=દાન) જન્ય ભાવવિશેષરૂપ સંબંધથી દાન પણ ફળાધિકરણ છંદકાત્મામાં રહ્યું જ હોઈ કાર્યને સમાનાધિકરણ જ છે. તેથી દાનમાં ફળની પ્રત્યે હેતુતા અસંભવિત નથી. માટે છન્દ્ય જો અશનાદિનું ગ્રહણ ન કરે તો તે ગ્રહણજન્ય ફળથી અને છંદક દાનજન્યફળથી અવશ્ય વંચિત રહે જ છે." આવી શંકાનું સમાધાન આપતાં ગ્રન્થકાર કહે છે—

જો કે છન્દ્યમુનિ આહારનો અસ્વીકાર કરે ત્યારે દાન–ગ્રહણથી ઉત્પન્ન થનાર સુકૃતાનુમોદના થતી નથી. 'મેં આ મહાત્માને આહારાદિ આપ્યા એ બહુ સુંદર થયું, અસાર એવા પણ આ શરીરની શક્તિનું સંસારમાં આ જ ખરું ફળ છે કે જે આવા મહાત્માઓની સામો બદલો મેળવવાની આશા વિના જ વૈયાવચ્ચ કરવી.' ઇત્યાદિ અનુમોદના દાતાને તો જ થાય જો દાન થયું હોય. નહિતર તો 'ઓહો ! મેં તો

चेतोभावबृद्ध्या प्रत्युपकारान्ममापि स्वाध्यायाद्युपष्टम्भसंभवाच्चे''ति सुकृतानुमोदनमुज्जृम्भते, अन्यथा तु न किञ्चिदेतदिति। तथाऽपि तयं इति सुकृतानुमोदनं विधिपालनसमुद्भवं= भगवदुपदेशाराधनप्रसूतं नियमेन=निश्चयेन भवति, दातुर्दानमात्राऽननुमोदनेऽपि स्वकृतवैयावृत्त्यादेरदीनतयाऽनुमोदनसंभवात्। दीनता पुनरविवेकविजृम्भितमेवेति न विवेकिनां तया बाधा, छन्द्यस्याप्येतदनुमोदनं प्रायः संभवत्येवेति न किञ्चिदनुपपन्नम्। स्वजन्यभावविशेषसंबन्धेन दानस्य तु न हेतुत्वम्, भावविशेषस्यैवावश्यहेतुतया दानस्याऽन्यथासिद्धत्वात्। " दासेण मे खरो कीओ " इत्यादिन्यायेन तद्धेतुत्वे च घटादौ दण्डावयवस्यापि हेतुत्वव्यवहारप्रसङ्गादिति निश्चयनयनिष्कर्षः। व्यवहारतोऽपि तद्धेतुत्वं फलविशेष एवेति न तद्विनापि छन्दनाजन्यफलसामान्यानुपपत्तिरिति बोध्यम् ॥ ५८ ॥ ३ ग्रहण जन्य भावजन्य निर्जराया,

अथ कथं प्रवर्त्तमानस्य छन्दकस्य लाभो भवति? कथं वा न? इत्यनुशास्ति—

नाणादुवग्गहस्सासंसाए छंदगो कुणउ किच्चं।
ण य पत्थिंतो तत्तो पच्चुवयारं च कित्तिं च ॥ ५९ ॥

(ज्ञानाद्युपग्रहाशंसया छन्दकः करोतु कृत्यम्। न च प्रार्थयमानस्ततः प्रत्युपकारं च कीर्त्तिं च ॥ ५९ ॥)

અધિક આહારાદિ લાવવાનું કષ્ટ જ કર્યું', પણ એ સફળ ન થયું' ઇત્યાદિ દીનતા થવાથી સુકૃતાનુમોદના કુંઠિત જ થઇ જાય છે. એમ છંદને પણ પોતે ગ્રહણ કરે તો જ 'આ અદીન મહાત્મા પરાર્થ માટે સારો ઉદ્યમ કરે છે. વળી મેં પણ એમણે આપેલ અશનાદિનું જે ગ્રહણ કર્યું તે બહું સારું થયું, કેમકે એ રીતે પણ એમના ચિત્તના ભાવ વધવાથી પ્રત્યુપકાર થયો તેમજ મારે પણ સ્વાધ્યાયાદિને ટેકો મળી ગયો.' ઇત્યાદિ અનુમોદના થાય છે. આમ દાન-ગ્રહણ ન થવામાં આવી અનુમોદનાથી વંચિત રહેવાનું થાય છે તેમ છતાં ભગવદુપદેશની આરાધનાના પાલનમાંથી ઉત્પન્ન થએલ સુકૃતઅનુમોદના તો અવશ્ય થાય જ છે, કેમકે દાનમાત્રની અનુમોદના ન હોવા છતાં દાતાને પોતે કરેલ વૈયાવચ્ચ વગેરેની અનુમોદના તો અદીનતાના કારણે સંભવે જ છે. છંદે અસ્વીકાર કર્યો હોય તો પણ, દીનતા તો અવિવેકના કારણે જ થતી હોઈ વિવેકીને કોઇ નુકશાન થતું નથી. એ જ રીતે છંદને પણ આવું અનુમોદન સંભવે જ છે કે 'આ મહાત્મા વૈયાવચ્ચ વગેરેમાં સારા ઉદ્યમી છે...' માટે ફળપ્રાપ્તિ થવામાં કોઇ અસંગતિ નથી.

વળી દાન સ્વજન્ય ભાવવિશેષ સંબંધથી ફળ પ્રત્યે હેતુ છે એ વાત પણ અયુક્ત છે, કેમકે ભાવવિશેષ તો હેતુરૂપ હોવો આવશ્યક જ હોઇ દાન તેનાથી પંચમ અન્યથાસિદ્ધ છે, 'મારા નોકરે ગધેડો ખરીધો. તે નોકર પણ મારો છે અને તેથી ગધેડો પણ મારો છે' એવા ન્યાય મુજબ દાનને પણ જો હેતુ માનશો (અર્થાત્ જે ભાવને હેતુતા પ્રાપ્ત થઈ છે તે ભાવ 'દાન'નો છે, કેમકે દાન આપવાના ભાવમાં જ હેતુતા છે.તેથી હેતુતા પણ દાનની છે એવું જો માનશો) તો દંડના અવયવોને પણ ઘટકાર્યના કારણ માનવા પડશે, કેમકે દંડ પોતે દંડાવયવનો હોઇ (દંડ, સમવાય સંબંધથી દંડાવયવોમાં રહ્યો હોઈ તેઓનો છે) તેની હેતુતા પણ દંડાવયવોની છે.તેથી નિશ્ચયનય મુજબ

णाणादुवग्गहत्ति । ज्ञानमादिर्येषां तपःसंयमोत्कर्षादीनां ते ज्ञानादयः तेषामुपग्रहो=वृद्धिः तदाशंसया=तदिच्छया छन्दकः=छन्दनाकारी कृत्यं=भक्ताद्यानयनं करोतु । तथाऽभिलाषेणैव तस्य वैयावृत्त्यकरणं बलवदनिष्टाऽननुबन्धीष्टसाधनमिति भावः । च पुनः ततः=छन्द्यात् प्रत्युपकारं च=कालान्तरे भक्ताद्यानयनवस्त्रदानादिरूपं च कीर्त्तिं च=स्वगतश्लाघां च पत्थिंतो इति प्रार्थयमानो न कुर्यात् । प्रत्युपकारकीर्त्त्यादीच्छया तत्करणं तस्यानिष्टसाधनमिति भावः । । ५९ ॥

अथ कथं छन्दकेन वैयावृत्त्यकारणे छन्द्यस्य लाभः ? कथं वा न ? इति विवेचयितुमाह–

कारेउ अ इअरो वि हु एत्तो एयस्स होउ लाभो त्ति ।
नो पुण अलस्सत्तणओ पच्चुवयारं च दाइंतो ॥ ६० ॥

(कारयतु चेतरोऽपि हु इत एतस्य भवतु लाभ इति । न पुनरलसत्वात् प्रत्युपकारं च दर्शयन् ॥६०॥)

कारेउ त्ति । इतरोऽपि=छन्दकापेक्षयाऽन्यश्छन्द्योऽपि हुः प्राग्वत् कारयतु च कृत्यमिति प्राक्तनगाथातोऽनुषङ्गः । कथम् ? इत्याह–इतः=मम वैयावृत्त्यकारणात् एतस्य=छन्दकस्य भवतु लाभः=निर्जराविशेष इति हेतोः । एवं च तन्निर्जरार्थितयैव तस्य स्ववैयावृत्त्यकरणानुज्ञा इष्टसाधनमित्युक्तं भवति । इदमुपलक्षणं स्वगतस्वाध्यायादिगुणोपष्टम्भार्थितयाऽपि तदनुज्ञा तथा, न पुनः अलसत्वात्= स्वगतशक्तिनिगूहनात् प्रत्युपकारं च दर्शयन्, " यदि त्वं ममैतत्कृत्यं करिष्यसि तदाऽहमपि तव विशिष्टं कार्यान्तरं करिष्यामि" इति प्रलोभयन् कारयेत् कृत्यम् ।

તો ભાવ જ ફળપ્રત્યે હેતુ છે, દાન નહિ. દાનમાં, વ્યવહારનયમુજબ પણ જે હેતુતા છે તે પણ ફળ વિશેષની જ (સુકૃત અનુમોદનાદિ જન્ય નિર્જરા વિશિષ્ટ છંદનાજન્ય-નિર્જરાદિની જ) છે, છંદના જન્ય નિર્જરારૂપ ફળ સામાન્યની નહિ. તેથી દાન ન થવા છતાં પણ છંદના જન્ય ફળ સામાન્યની પ્રાપ્તિ થવી અસંગત નથી એ જાણવું. ॥૫૮॥

છંદક કઇ રીતે પૂર્વગૃહીત અશનાદિની નિમંત્રણા કરે તો ફળપ્રાપ્તિ થાય ? અને શી રીતે કરે તો ન થાય ? એ જણાવતાં ગ્રન્થકાર કહે છે–

તપ, સંયમ, જ્ઞાન વગેરેની વૃદ્ધિની આશંસાથી છંદકે આહારાદિ લાવવા જોઈએ. તેમજ એની છંદના કરવી જોઈએ. આવી અભિલાષાઓથી કરાએલ વૈયાવચ્ચ જ બલવાન્ અનિષ્ટ ઊભું ન કરે એવા ઈષ્ટસાધનરૂપ બને છે. તેમ જ 'ભવિષ્યમાં એ મને આહારાદિ લાવી આપશે કે વસ્ત્રાદિ આપશે' એવા છંદ્ય તરફથી થનાર પ્રત્યુપકારની તેમજ પોતાની કીર્ત્તિની ઇચ્છા રાખ્યા વગર જ છંદના કરવી જોઇએ, કેમ કે પ્રત્યુપકાર કીર્ત્તિ વગેરેની ઇચ્છાથી છંદના કરવી એ ભવિષ્યમાં અનિષ્ટ લાવી આપનાર છે. ॥૫૯॥

છંદક પાસે વૈયાવચ્ચ કરાવવામાં છંદ્યને શી રીતે લાભ થાય ? અથવા શી રીતે લાભ ન થાય ? એનું વિવેચન કરવા ગ્રન્થકાર કહે છે–

છંદ્યે પણ 'મારી વૈયાવચ્ચ કરવાથી છંદકને નિર્જરાવિશેષ થવા રૂપ લાભ થાઓ' એવી ભાવનાથી જ અશનાદિનું ગ્રહણ કરવું જોઇએ. અર્થાત્ છંદકને થનાર નિર્જરાની ઇચ્છાથી જ પોતાની (=છંદ્યની) વૈયાવચ્ચ કરવાની અનુજ્ઞા આપવી એ છંદ્યનું ઇષ્ટસાધન છે. અહીં ઉપલક્ષણથી એ પણ સમજી લેવું કે પોતાના સ્વાધ્યાયાદિ ગુણોના ઉપષ્ટંભ

तथा च स्वशक्तिनिगूहनादिना तस्य तदनुज्ञाऽनिष्टसाधनमित्युक्तम् । अत्रेदं तत्त्वम्—मोक्षेच्छाजन्यप्रवृत्तौ तदुपायतया ज्ञानाद्युपष्टम्भ एवेच्छोपयुज्यते, कीर्त्यादौ तदुपायत्वं प्रतिसन्धाय तदिच्छया त्वज्ञाननिमित्तकः कर्मबन्धः । निरुपाधिकेच्छा तु तत्र न संभवति, सुखदुःखहान्यन्यतरत्वाभावात्, ऐहिकसुखहेतुतया तत्रेच्छायां तु मोहनिमित्तकर्मबन्ध इति । न च मोक्षेच्छाया अपि रागरूपतया कर्मबन्धहेतुत्वमेवेति वाच्यम्, अनभिष्वङ्गरूपतया तस्यारतथात्वाभावात्, बहूनेदृशं विनाश्यानुविनाशवत्तस्या अपि कर्मविनाश्यानुविनाशात् इत्यन्यत्र विस्तर इति ॥६०॥

अथैवंविधगुणयोगेन छन्दकच्छन्द्ययोः सामाचारीपालनक्षमत्वमित्युद्घोषयति—

एवं एयगुणाणं कहिया गंभीरधीरया दोण्हं ।
छंदणसामायारी एएहिं परिजिआ होइ ॥ ६१ ॥

(एवमेतद्गुणयोः कथिता गंभीरधीरता द्वयोः । छंदनासामाचार्यैतास्यां परिजिता भवति ॥ ६१ ॥)

॥ छंदणा समत्ता ॥

एवं ति । एवं=उक्तरीत्या **एतद्गुणयोः**=उक्तगुणयुक्तयोः **द्वयोः**=छन्दकच्छन्द्ययोः **गम्भीरधीरता**=गम्भीरौ अलक्षितचित्ताभिप्रायौ धीरौ च कार्यनान्तरीयकस्वगतपरिभवसहिष्णू तयोर्भावस्तथाता **कथिता**=प्ररूपिता—"[1]दोण्ह-वि इट्ठफलं तं अतिगम्भीराण धीराणं" [पंचा० १२/३६] इत्यादिना प्रबन्धेन पूर्वाचार्यैरिति गम्यम् । **एताभ्यां**=गम्भीरधीराभ्यां छन्दकच्छन्द्याभ्यां **छन्दनासामाचारी परिजिता भवति**=स्वायत्तीकृता भवति ॥ ६१ ॥

॥ इति न्यायविशारदविरचिते सामाचारीप्रकरणे छन्दना विवृता ॥ ८ ॥

माटे पण ते अनुज्ञा आपवीओ तेनुं अिष्टसाधन छे. पण पोतानी शक्ति छूपाववा रूप आळसुपणाना कारणे के 'जे तुं मारुं आ काम करीश तो हुं पण तारुं बीजुं कोई विशिष्ट कार्य करी आपीश' एवो प्रत्युपकार देखाडीने पोतानी वैयावच्च करावबी नहि. अर्थात् पोतानी शक्ति छूपावबी वगेरे रूप कारणे अनुज्ञा आपबी ओ अनिष्ट साधन छे. आ बाबतमां रहस्य आ छे—

मोक्षनी इच्छाथी थती छंदनादि प्रवृत्तिमां ज्ञानादिवृद्धिनी इच्छा ज उपयोगी छे, केमके ज्ञानादि ज मोक्षना उपायभूत छे. छंदनाने कीर्ति वगेरेना उपाय तरीके मानी ने तेनी (=कीर्त्ति वगेरेनी) इच्छाथी छंदनादि प्रवृत्ति करवामां तो अज्ञाननिमित्तक कर्मबंध ज थाय छे, मोक्षप्राप्ति नहि. वळी छंदनादिनी निरुपाधिक इच्छा (एटले के जे इच्छा बीजी कोई इच्छाने आधीन न होय एवी स्वतंत्र इच्छा) तो संभवती ज नथी, केमके ओ तो सुख के दुःखहानि ओ बेमांथी एकनी ज होय छे, ज्यारे छंदनादि ते बेमांथी एकेय रूप नथी छंदनादिने ऐहिक सुखनुं कारण मानी ने करवामां तो मोहनिमित्तक कर्मबंध थाय छे, केमके ऐहिकसुखनी इच्छा रागात्मक मोह रूप छे.

शंका :– मोक्षेच्छा पण सुखेच्छा रूप ज होवाना कारणे रागरूप होई कर्मबंध ज करावे छे. तेथी तज्जन्यप्रवृत्तिथी पण कर्मबंध ज थवो जोइओ.

समाधान :– मोक्षेच्छा अनभिष्वंगरूप होई रागरूप नथी. तेथी कर्मबंध थतो

---

१ अस्य पूर्वार्धः–नाणादुवग्गहे सइ अहिगे गहणं इमस्सऽणुण्णायं । द्वयोरपि इष्टफलं तदतिगम्भीरयोर्धीरयोः ॥

इयाणिं णिमंतणा भन्नइ–

अथ निमन्त्रणा विव्रियते, तत्रादौ तल्लक्षणमाह–

गुरुपुच्छाइ मुणीणं अग्गहियसंपत्थणा णिमंतणया ।
सज्झायाइरयस्स वि कज्जुज्जुत्तस्स सा होइ ॥ ६२ ॥

(गुरुपृच्छया मुनीनामगृहीतसंप्रार्थना निमन्त्रणका । स्वाध्यायादिरतस्यापि कार्योद्युक्तस्य सा भवति ॥ ६२ ॥)

गुरु त्ति । यतीनां=साधूनां **गुरुपृच्छया**=धर्माचार्याज्ञया **अगृहीतस्य**=अनानीतस्याशनादेरिति गम्यते, **संप्रार्थना**=भावविशुद्धिपूर्विका प्रार्थना 'निमंत्तणया' इति स्वार्थिक 'क'-प्रत्ययान्ततया **निमन्त्रणका**=निमन्त्रणा सामाचारी भवति । अत्राऽगृहीतेति पदं छन्दनावारणाय । शेषमुक्तप्रयोजनम् । **स्वाध्यायादौ**-स्वाध्यायो वाचनादिरूपः आदिशब्दाद् वस्त्रधावनादिरूपं गुरुकृत्यं च, तत्र **रतस्यापि**=उद्यतस्यापि स्वाध्यायादिकरणपरिश्रान्तस्यापि इत्यर्थः **कार्योद्युक्तस्य**=कार्ये वैयावृत्त्यलक्षण **उद्युक्तस्य**=बद्धाभिलाषस्य **सा**=निमन्त्रणा भवति कर्त्तव्येति शेषः । तदिदमुक्तम्–[पंचा०१२/३८]

१ सज्झायादुव्वाओ गुरुकिच्चे सेसगे असंतंमि । तं पुच्छिऊण कज्जे सेसाण णिमंतणं कुज्जा ॥ इति ॥६२॥

નથી. અગ્નિ જેમ કાષ્ઠ વગેરે બળતણનો નાશ કરીને પછી પોતે સ્વયં પણ નાશ પામી જાય છે, એમ મોક્ષેચ્છા પણ કર્મનો નાશ કરીને પછી સ્વયં પણ નષ્ટ થઈ જાય છે. તેથી કોઈ અસંગતિ નથી. આ અંગેની વધુ વિચારણા અન્યત્ર કરેલી છે. ॥૬૦॥

આવા પ્રકારના ગુણોની હાજરીથી જ છંદક અને છંદ્ય સામાચારીનું પાલન કરવામાં સમર્થ બને છે એવી ઉદ્ઘોષણા કરતાં ગ્રન્થકાર કહે છે–

આમ ઉક્ત ગુણવાળા હોય તેવા છંદક અને છંદ્ય બન્નેમા. 'અતિગંભીર અને ધીર એવા તે બન્નેને દૃષ્ટફળની પ્રાપ્તિ થાય છે' ઇત્યાદિ ગ્રન્થથી, પૂર્વાચાર્ય ભગવંતોએ ચિત્તનો અભિપ્રાય બહાર ન પડવા દેવા રૂપ ગંભીરતા અને કાર્યમાં વચમાં આવી પડેલ વિઘ્નને સહન કરી લેવા રૂપ ધીરતા હોવી જણાવી છે. આવા ગંભીર અને ધીર છંદ્ય-છંદક છંદના સામાચારીને પરિજિત=સ્વાયત્ત=સ્થિર કરે છે. ॥૬૧॥

॥ આમ ન્યાયવિશારદવિરચિત સામાચારી પ્રકરણમાં છંદનાની અર્થ-પ્રરૂપણા પૂર્ણ થઈ. ॥ ૮ ॥

હવે નિમંત્રણા સામાચારીનું વિવરણ કરાય છે. તેમાં સૌ પ્રથમ તેનું લક્ષણ જણાવતાં ગ્રન્થકાર કહે છે–

[નિમન્ત્રણા સામાચારીનું લક્ષણ અને વિષય]

અશનાદિને લાવવા પૂર્વે જ, ધર્માચાર્યની આજ્ઞાપૂર્વક સાધુઓને ભાવથી (પોતે તે લાવી આપે એ માટે) પ્રાર્થના કરવી એ નિમન્ત્રણા સામાચારી છે. સ્વાર્થિક 'ક' પ્રત્યય લાગ્યો હોવાથી 'નિમન્ત્રણકા' શબ્દનો અર્થ 'નિમન્ત્રણા' જ જાણવો. અહીં 'અગૃહીત' એવું અશનાદિનું જે વિશેષણ લગાડયું છે તે છંદનામાં લક્ષણ ચાલ્યું ન

---

१ स्वाध्यायाद्युद्व्रातः गुरुकृत्ये शेषकेऽसति । तं पृष्ट्वा कार्ये शेषाणां निमंत्रणां कुर्यात् ॥

अथ स्वाध्यायादिखिन्नस्य कथं वैयावृत्त्यादावुद्योगः ? इत्यत्राह—

इच्छाऽविच्छेदेणं कज्जुज्जोगो अ हंदि पइसमयं ।
परिणयजिणवयणाणं एसो अ महाणुभावाणं ॥ ६३ ॥

(इच्छाऽविच्छेदेन कार्योद्योगश्च हंदि प्रतिसमयम् । परिणतजिनवचनानामेष च महानुभावानाम् ॥ ६३ ॥)

इच्छ त्ति । **प्रतिसमयं**=समयं समयं प्रति, **कार्योद्योगश्च**=कृत्योद्यमश्चेच्छाया=मोक्षकाङ्क्षाया **अविच्छेदेन**=नैरन्तर्येण भवतीति शेषः । हंदि इत्युपदर्शने, **एष च**=इच्छाऽविच्छेदश्च **परिणतजिनवचनानां**=सम्यक् श्रद्धागोचरीकृतप्रवचनतत्त्वानां महानुभावानां=महाप्रभावानां भवति । मोक्षोपायेच्छाऽविच्छेदेन हि प्रवृत्त्यविच्छेदः, तदविच्छेदश्च मोक्षेच्छाऽविच्छेदात्, तदविच्छेदश्च प्रतिकूलेच्छयाऽप्रतिबन्धादप्रमादाच्च, प्रतिकूलेच्छाप्रमादपरिहारश्च विवेकात्, विवेकश्च नैरन्तर्येण भगवद्वचनपरिभावनं, तच्च क्षयोपशमविशेषप्रगुणीकृतशक्तेर्महाशयस्यैव कस्यचिद् गोष्पदीकृतभवजलधेरेव जन्तोः संभवतीति बोध्यम् ॥ ६३ ॥ इच्छाऽविच्छेदानुकूलमेवोपदेशमाह—

જાય એ માટે જાણવું. ગુરુપૃચ્છા વગેરે વિશેષણો લગાડવાનું પ્રયોજન પૂર્વમુજબ જાણી લેવું.

પ્રશ્ન – આ સામાચારી કોને હોય છે ?

ઉત્તર – સ્વાધ્યાય, વસ્ત્રધાવનાદિ રૂપ ગુરુકૃત્ય વગેરેમાં સદા ઉદ્યત હોય અને કદાચ તેનાથી થાકેલ પણ હોય એવા પણ વૈયાવચ્ચની લિપ્સા વાળા સાધુએ નિમન્ત્રણા કરવી જોઇએ. કહ્યું છે કે 'સ્વાધ્યાયાદિથી પરિશ્રાન્ત થયો હોય અને બીજા ગુરુકૃત્ય એ વખતે ન હોય તો ગુરુને પૂછીને શેષ સાધુઓને નિમન્ત્રણા કરવી જોઇએ.' ॥ ૬૨ ॥

સ્વાધ્યાયાદિથી ખિન્ન થએલ સાધુ વૈયાવચ્ચ વગેરેમાં પણ શી રીતે ઉદ્યમ કરે ? એવી શંકાને મનમાં રાખીને ગ્રન્થકાર કહે છે–

જેઓએ જિનવચનની સમ્યક્ પરિણતિ ઊભી કરી છે અર્થાત્ સમ્યક્ શ્રદ્ધા કરેલી છે તેવા મહાનુભાવ મહાત્માઓને મોક્ષની ઇચ્છા ક્યારેય વિચ્છિન્ન થતી નથી. તેથી તેઓને પ્રત્યેક સમયે મોક્ષોપાયરૂપ કર્ત્તવ્યભૂત કાર્યોમાં ઉદ્યમ પ્રવર્ત્યા જ કરે છે. માટે તેઓ સ્વાધ્યાયાદિથી ખેદ પામેલા હોવા છતાં વૈયાવચ્ચ વગેરેમાં ઉદ્યત બને જ છે. અહીં આ પ્રવૃત્તિ થવામાં આ ક્રમ જાણવો. જેઓનો ભવસમુદ્ર ખાબોચિયા જેવો થઈ ગયો છે (અર્થાત્ હવે નજીકમાં મુક્તિ છે) તેવા કોઇક મહાશયને જ ક્ષયોપશમના કારણે શક્તિ વિશેષ પ્રકારે ખીલેલી હોઈ જિન વચનોનું નિરંતર પરિભાવન હોય છે. આ પરિભાવનના કારણે તેઓને વિવેક પ્રગટે છે જેનાથી મોક્ષને પ્રતિકૂળ ઇચ્છા અને પ્રમાદનો પરિહાર થાય છે. પ્રતિકૂળ ઇચ્છા ન હોવાથી મોક્ષેચ્છાનો પ્રતિબંધ થતો નથી. તેમજ અપ્રમત્તભાવ જાગતો હોવાથી પણ મોક્ષેચ્છાનો વિચ્છેદ થતો નથી. મોક્ષેચ્છા અવિચ્છિન્ન રહેતી હોવાથી મોક્ષના ઉપાયોની ઇચ્છા પણ સદા અવિચ્છિન્ન રહે છે જેના કારણે તે ઉપાયોમાં સતત પ્રવૃત્તિ થયા કરે છે. તેથી એક ઉપાયમાં થાક લાગે તો પણ બીજા ઉપાયમાં તો પ્રવૃત્તિ થાય જ છે. ॥૬૩॥ મોક્ષેચ્છાનો અવિચ્છેદ

माणुस्सं संसारे मरुम्मि कप्पद्दुमो व्व अइदुलहं ।
एयं लद्धूण सया अप्पमत्तेणेव होयव्वं ॥६४॥

(मानुष्यं संसारे मरौ कल्पद्रुम इवातिदुर्लभम् । एतल्लब्ध्वा सदाऽप्रमत्तेनैव भवितव्यम् ॥६४॥)

माणुस्सं ति । **संसारे**=गतिचतुष्टये **मानुष्यमतिदुर्लभं** = अतिदुःखेन लभ्यते, बादरत्व-त्रसत्व-पञ्चेन्द्रियत्व-मानुष्यादिप्राप्तेरुत्तरोत्तरप्रकर्षशालिपुण्यप्राग्भारलभ्यत्वाभिधानात् । कुत्र किमिव ? मरौ कल्पतरुरिव । तत्र हि देशे नीरसतया वृक्षान्तरमपि न लभ्यते कुतस्तरां तत्र नन्दनवन-प्रदेशोत्पत्तिककल्पतरुसंभावनाऽपि । यथा च तत्रापि कदाचित्प्रथमारकादिसंभवी युगलिजनमहिम्ना कल्पतरोरपि संभवस्तथासंसारेऽपि कदाचित्पुण्यातिशयान्मनुष्यभवलाभसंभवोऽपि । एवमतिदुष्करं **एतत्**=मानुष्यं **लब्ध्वा**=प्राप्य **सदा**=सर्वदा **अप्रमत्तेनैव**=प्रमादरहितेनैव भवितव्यम् । एवं चास्योपदेशपरिकर्मितमतेर्मतिभ्रंशालस्याद्यभावाद् मोक्षकाङ्क्षा न कदाचिदपि व्यवच्छिद्यते इति बोध्यम् ॥ ६४ ॥ अथाऽविच्छिन्नमोक्षेच्छस्य तदुपायेच्छाऽविच्छेदे दृष्टान्तमाह—

छुहिअस्स जहा खणमवि विच्छिज्जइ णेव भोअणे इच्छा ।
एवं मोक्खट्ठीणं छिज्जइ इच्छा ण कज्जंमि ॥ ६५ ॥

(क्षुधितस्य यथा क्षणमपि विच्छिद्यते नैव भोजन इच्छा । एवं मोक्षार्थिनां छिद्यत इच्छा न कार्ये ॥६५॥)

જળવાઇ રહે એવો અનુકૂલ ઉપદેશ આપતાં ગ્રન્થકાર કહે છે–

"બાદરપણું, ત્રસપણું, પંચેન્દ્રિયપણું, મનુષ્યપણું વગેરેની પ્રાપ્તિ ઉત્તરોત્તર ચઢિયાતા થોકબંધ પુણ્યથી થાય છે" એવી શાસ્ત્રોક્તિથી જણાય છે કે મરુભૂમિમાં કલ્પ-વૃક્ષ જેમ અતિદુર્લભ છે તેમ ચારગતિરૂપ સંસારમાં મનુષ્યપણું અતિદુર્લભ છે. મરુદેશ નીરસ હોવાના કારણે ત્યાં બીજા વૃક્ષો પણ જો ઊગતા નથી તો નંદનવનમાં ઉત્પન્ન થતાં કલ્પવૃક્ષોની તો ત્યાં સંભાવના જ કયાંથી હોય ? તેમ છતાં ત્યાં પણ પહેલા વગેરે આરામાં યુગલિયાઓના પુણ્યપ્રભાવે કલ્પવૃક્ષો પણ સંભવિત બને છે તેમ સંસારમાં પણ કયારેક પુણ્યના ચઢિયાતાપણાના કારણે મનુષ્યભવની પ્રાપ્તિ સંભવિત બને છે. અત્યંત દુર્લભ આ મનુષ્યપણું પામીને હંમેશાં અપ્રમત્ત રહેવું જોઇએ. આવા બધા ઉપદેશથી પરિકર્મિત થયેલ મતિવાળા મહાત્માને મતિભ્રંશ–આળસ વગેરેનો અભાવ હોવાથી મોક્ષાકાંક્ષા કયારેય પણ ખસતી નથી એ જાણવું. ॥ ૬૪ ॥

જેની મોક્ષેચ્છા ઊતરી ગઇ નથી તેની તેના ઉપાયોની ઇચ્છા પણ નિવૃત્ત થતી નથી એ અંગે દૃષ્ટાન્ત આપતાં ગ્રન્થકાર કહે છે—

[મોક્ષેચ્છુની ઉપાયેચ્છા અવિચ્છિન્ન હોય]

ક્ષુધાવેદનીયના ઉદયથી ભૂખ્યા થયેલા માણસને જ્યાં સુધી ભૂખ શમે નહિ ત્યાં સુધી જેમ એક ક્ષણ પણ ભોજનની ઇચ્છા ખસતી નથી તેમ મોક્ષાર્થીની મોક્ષના ઉપાયભૂત કાર્ય અંગેની ઇચ્છા વિચ્છિન્ન થતી નથી, કેમકે મોક્ષરૂપ ફળ હજુ સિદ્ધ થયું નથી.

શંકા :– જેમ ઘડાની ઇચ્છા કોઇ એક ઘડો પ્રાપ્ત થઈ જવા માત્રથી જ ખસી જાય છે એમ મોક્ષોપાયની ઇચ્છા પણ તેનો કોઇ એક ઉપાય સિદ્ધ થવા માત્રથી ખસી

छुहिअस्सत्ति । क्षुधितस्य=उदितक्षुद्वेदनीयस्य **यथा क्षणमपि भोजन इच्छा न विच्छिद्यते तथा मोक्षार्थिनां**=परमपदाभिलाषुकाणां **कार्ये**=तदुपाये **इच्छा न विच्छिद्यते**, फलस्याऽसिद्धत्वादिति भावः । **अथ** यथा घटेच्छा यत्किञ्चिद्घटसिद्धत्वेनैव विधूयते, एवं मोक्षोपायेच्छाऽपि यत्किञ्चिदुपायसिद्धतयैव निरस्यतामिति **चेत्**? **न**, यत्किञ्चिद्घटमात्रलाभेऽपि जलाहरणाद्युद्देश्यसिद्ध्या तत्र फलेच्छां विना तदुपायेच्छाविच्छेदात् । मोक्षोपायस्य तु यस्य कस्यचिल्लाभेऽप्युद्देश्यमोक्षाऽसिद्ध्या तदिच्छाऽविच्छेदेन तदुपायेच्छाऽविच्छेदात् ॥ ६५ ॥

ननु तथाऽपि कृतवैयावृत्त्यस्य साधोः कथं समयान्तरे तत्रैवेच्छा? तस्य सिद्धत्वज्ञानेन तत्रेच्छाप्रतिबन्धात्–इत्याशङ्कामपनिनीषुराह—

सिद्धे मुणीण कज्जे तम्मि वि इच्छोचिया असिद्धम्मि ।
उक्किट्ठे तेणेव य समत्थियं किर णमुत्थु त्ति ॥६६॥

(सिद्धे मुनीनां कार्ये तस्मिन्नपि इच्छोचिताऽसिद्धे । उत्कृष्टे तेनैव च समर्थितं किल नमोऽस्त्विति ॥६६॥)

सिद्धे त्ति । मुनीनां **कार्ये**=साधुसंबन्धिवैयावृत्त्यादिकृत्ये **सिद्धे** सति **तस्मिन्नपि**=वैयावृत्त्यादिकृत्ये **उत्कृष्टे**=प्राक्तनकार्याऽपेक्षयाऽतिशयशालिनि **असिद्धे**=अनुत्पन्ने **इच्छा**=वाञ्छा **उचिता**=योग्या । अयं भावः–सिद्धत्वज्ञानं हि यद्द्रव्यक्तिविषयं तद्द्रव्यक्तिविषयिणीमेवेच्छां प्रतिबध्नाति न तु तदन्यद्रव्यक्तिविषयिणीमपि, अन्यथैकस्मिन् सुखे सिद्धे सुखान्तरेच्छाविच्छेदप्रसङ्ग इति महत्सङ्कटम् । किञ्चैवं "न जातु कामः कामानामुपभोगेन शाम्यति ।" इति वचनविरोधः ।

જવી જોઇએ. અર્થાત્ જેણે સ્વાધ્યાયાદિ કરી લીધા છે તેને મોક્ષોપાયભૂત વૈયાવચ્ચાદિની ઇચ્છા રહેવી ન જોઇએ, કેમકે સ્વાધ્યાયાદિ મોક્ષોપાય તેને સિદ્ધ થઇ ગયો છે.

સમાધાન :– ઘટેચ્છાવાળાને જે ઉદ્દેશથી ઘડાની ઇચ્છા છે તે જળાહરણ વગેરે રૂપ ઉદ્દેશ તો ગમે તે એક ઘડાથી પણ સિદ્ધ થઈ જાય છે. તેથી જળાહરણાદિ ફળની ઇચ્છા નિવૃત્ત થઇ જાય છે. તેથી તેના ઉપાય ભૂત ઘડાની ઇચ્છા પણ નિવૃત્ત થઇ જાય છે. પણ સ્વાધ્યાયાદિરૂપ કોઇ એક મોક્ષોપાય સિદ્ધ થવા માત્રથી ઉદ્દેશ્યભૂત મોક્ષ સિદ્ધ થતો નથી. તેથી ઉદ્દેશ્ય એવા મોક્ષની ઇચ્છા ખસતી ન હોવાથી તેના ઇતર ઉપાયોની ઇચ્છા તો શી રીતે ખસે? ॥ ૬૫ ॥

" છતાં પણ જેણે વૈયાવચ્ચ કરી લીધી છે એને કાલાન્તરે વૈયાવચ્ચ કરવાની ઇચ્છા ફરીથી શી રીતે થાય? કેમકે 'મેં વૈયાવચ્ચ કરી લીધી છે' ઇત્યાદિ રૂપ સિદ્ધત્વજ્ઞાનથી તે ઇચ્છા પ્રતિબંધિત થઈ જાય છે. જેમકે ભૂખ્યાને ભોજન કરી લીધા પછી ભોજનેચ્છા ઊભી રહેતી નથી." આવી શંકાને દૂર કરવાની ઇચ્છાથી ગ્રન્થકાર કહે છે–

સાધુ સંબંધી વૈયાવચ્ચાદિ કૃત્ય સિદ્ધ થવા છતાં તે જ વૈયાવચ્ચાદિના ઊંચા પ્રકાર (=ભેદ=પૂર્વે કરેલ વૈયાવચ્ચ કરતાં ચઢિયાતી કક્ષાના વૈયાવચ્ચાદિ કાર્ય) ની ઇચ્છા ઊભી રહેવી યુક્ત જ છે. તાત્પર્ય એ છે કે વૈયાવચ્ચવિશેષ રૂપ કાર્યવિશેષનું સિદ્ધત્વજ્ઞાન તેની જ ઇચ્છાનો પ્રતિબંધ કરે છે. પૂર્વકૃત વૈયાવચ્ચ કરતાં જુદા પ્રકારની વૈયાવચ્ચ વગેરે રૂપ કાર્યવિશેષની ઇચ્છાનો નહિ. નહિતર તો કોઇ પણ એક સુખ સિદ્ધ થઈ ગયે છતે બીજા કોઈ સુખની ઇચ્છા જ ઊભી ન રહેવા રૂપ મોટું સંકટ

सिद्धत्वज्ञानकृतः सामान्येच्छाविच्छेदस्तु नास्त्येव, किन्तु तत्र बलवद्द्वेषप्रयुक्त इत्यध्यात्ममत-परीक्षायां प्रपञ्चितम् । एवं चैककार्यस्य सिद्धत्वेऽपि तज्जातीयकार्यान्तरे इच्छा नानुपपन्ना । तेनैव च=उक्तहेतुनैव च किल इति सत्ये 'नमोऽस्तु' इति शक्रस्तववचनं समर्थितं=उपपादितम् । अत्रास्त्विति हि प्रार्थना, सा च सिद्धे नमस्कारे कथम् ? इति प्रत्यवस्थाने तदुत्कर्षस्याऽसिद्धत्वादेव तत्र तत्संभव इति ललितविस्तरायां भगवता हरिभद्रसूरिणा समर्थितम् । तथा च स(? त) द्ग्रन्थः—"यद्येवं न सामान्येनैवं पाठो युक्तः, भावनमस्कारवतस्तद्भावेन तत्साधनाऽयोगात् । एवमपि पाठे मृषावादः, 'असदभिधानं मृषा' इति वचनात्, असदभिधानं च भावतः सिद्धे तत्प्रार्थनावचः, तद्भावेन [1]तद्भावनायोगादिति, उच्यते-यत्किञ्चिदेतत्, तत्त्वाऽपरिज्ञानाद्, भावनमस्कारस्याप्युत्कर्षादिभेदोऽस्त्येवेति तत्त्वम् । एवं च भाव नमस्कारवतोऽपि तथातथोत्कर्षादिभावेनास्य तत्साधनायोगोऽसिद्धः, तदुत्कर्षस्य साध्यत्वेन तत्साधनोपपत्तेरिति । एवं चैवमपि पाठे मृषावाद इत्याद्यप्यन(? पा)र्थकमेव, असिद्धे तत्प्रार्थनावचः इति न्यायोपपत्तेरिति" । विस्तरस्तुमत्कृत विधिवादावबोध्यः ॥ ६६ ॥ अथेच्छाऽविच्छेदोऽपि योग्यतां विना न श्रेयानित्यनुशास्ति—

આવી પડે. વળી એવું હોવામાં તો 'કામ=શબ્દાદિ વિષયોની ઇચ્છા શબ્દાદિ કામોના ઉપભોગથી શાન્ત થતી નથી' ઇત્યાદિ વચનનો વિરોધ થશે, કેમકે ત્યાં પણ ઉપભોગથી સિદ્ધત્વજ્ઞાન તો થયેલ જ છે. વળી જેનાથી વિશેષ ઇચ્છાનો વિચ્છેદ થાય છે તે સિદ્ધત્વજ્ઞાનથી સામાન્ય ઇચ્છાનો વિચ્છેદ થતો નથી. કિન્તુ એ તો ઇચ્છાના વિષય પ્રત્યે ઉદ્ભવતા બલવદ્ દ્વેષથી જ થાય છે. અર્થાત્ તે ઇચ્છાના વિષયભૂત શબ્દાદિ અંગે જેટલું આકર્ષણ હોય એના કરતાં વધુ પ્રબળ થયેલ દ્વેષ જ એ ઇચ્છાને નિર્મૂળ કરી નાંખે છે. આ વાત **શ્રી અધ્યાત્મમત પરીક્ષા** (શ્લો. ૧૭૩) ગ્રન્થમાં ચર્ચી છે. આમ એક કાર્યવિશેષ સિદ્ધ થવા છતાં તેવા પ્રકારના બીજા કાર્ય વિશેષની ઇચ્છા ઊભી થવી-હોવી એ અસંગત નથી.

[નમુત્થુણંમાં ઉત્કૃષ્ટ નમસ્કારની પ્રાર્થના]

આવું કારણ બતાવીને જ શક્રસ્તવના 'નમુત્થુ' (નમોઽસ્તુ) વચનનું સમર્થન કરાયું છે. આમાં 'અસ્તુ' શબ્દથી પ્રાર્થના છે. નમઃ શબ્દથી નમસ્કાર રૂપ કાર્ય સિદ્ધ થઈ ગએ છતે એ પ્રાર્થના શા માટે ? એવી શંકાનું સમાધાન કરતાં ભગવાન **શ્રી હરિભદ્ર સૂરિ** મહારાજે **લલિતવિસ્તરા** ગ્રન્થમાં કહ્યું છે કે નમસ્કારનો ઉત્કર્ષ (ઊંચા પ્રકારનો નમસ્કાર) હજુ પણ અસિદ્ધ હોવાથી નમસ્કાર અંગે હજુ ઇચ્છા સંભવે છે. તે ગ્રન્થમાં શંકા-સમાધાનરૂપે એવું કહ્યું છે કે-'**શંકા** – દ્રવ્યાદિ નમસ્કારની અપેક્ષાએ ભાવનમસ્કાર ઉત્કૃષ્ટ નમસ્કાર છે. તેથી આ રીતે પ્રાર્થના યુક્ત વચન પ્રયોગ, સામાન્યથી બધાને માટે પાઠમાં મૂકવો યુક્ત નથી, કેમકે ભાવનમસ્કારવાળા ભક્તને તો તે પણ હાજર જ હોઈ તેને પુનઃ સાધવાનો હોતો નથી. વળી 'અસદ્=અસંભવિતનું (અયોગ્યનું) અભિધાન કરવું એ મૃષા છે,' એવા વચનને અનુસરીને આ રીતે પણ એમાં મૃષાવાદ છે, કેમકે ભાવથી વસ્તુ (ભાવ નમસ્કાર) સિદ્ધ થઈ ગયા પછી તેની પ્રાર્થના જણાવનાર વચન, તે વસ્તુ હાજર થઈ ગઈ હોવાથી હવે પ્રાર્થનીય રહી ન હોઈ અસદ્ અભિધાનરૂપ છે.

---

૧. तत्साधनाऽयोगादित्यर्थः ।

इच्छाऽविच्छेओ वि य ण तारिसो जोग्गयं विणा भद्दो ।
भद्दा कहिं णु इच्छा उज्जू वंको य दो मग्गा ॥६७॥

(इच्छाऽविच्छेदोऽपि च न तादृशो योग्यतां विना भद्रः । भद्रा कुत्र न्विच्छा ऋजुर्वक्रश्च द्वौ मार्गौ ॥६७॥)

इच्छ त्ति । इच्छाया अविच्छेदोऽपि=संतानोऽपि तादृशोऽपि=प्रशस्तालम्बनोऽपि, अत्रापि 'अपि'शब्दस्य काकाक्षिन्यायात् संबन्धः, योग्यतामौचित्यं विना न भद्रो, भद्रमस्त्यस्मिन्निति मत्वर्थीय'अ' प्रत्ययान्ततया भद्रवान्=परिणतावविलम्बितफलहेतुरित्यर्थः । अयं भावः-आचार्यादेर्वैयावृत्त्यादाविच्छा वैयावृत्त्यकरादेश्चाध्ययनाध्यापनादाविच्छा प्रसह्यानुचिता, कृतिसाध्यत्वविपर्यासे प्रवृत्तिविपर्यासात्, धृतिविशेषात् प्रसह्य कृतिसाध्यत्वज्ञानेऽपि प्रवृत्तितानवात् फलतानवापत्तेः । अत्रैव दृष्टान्तमुपदर्शयन् शिष्यमध्यापयति-ऋजुः=सरलः वक्रश्च=तद्विपरीतः द्वौ मार्गौ यत्र तत्रेति शेषः, कहिं इति कुत्र नु इति वितर्के इच्छा भद्रा=श्रेयसी ? मार्गत्वमात्रेण द्वयोः साम्येऽपि वक्रमार्गे गमनेच्छया तत्र प्रवृत्तौ विलम्बिता गमनप्राप्तिः, इतरथा त्वविलम्बिता, इति यथा ऋजुमार्गे एव गमनेच्छा श्रेयसी एवं मोक्षोपायत्वेन सकलसंयमयोगसाम्येऽपि यत्र यस्याधिकारपटवं तत्र तस्येच्छाऽविलम्बितसिद्धिक्षमतया श्रेयसी नान्यत्रेति विवेकः ॥ ६७ ॥
अथैतदुपसंहृत्य निमन्त्रणोपदेशमाह—

समाधान – આ તમારી વાત માલ વગરની છે, કેમકે તમે રહસ્ય સમજ્યા વિના બોલો છો. બધા ભાવ નમસ્કાર દ્રવ્યાદિ નમસ્કાર કરતાં ઉત્કૃષ્ટ હોવા છતાં પરસ્પર ઉત્કૃષ્ટ જ હોય એવો નિયમ નથી. એટલે કે ભાવ નમસ્કારના પણ ઉત્કર્ષ-અપકર્ષાદિ ભેદો હોય જ છે. તેથી ભાવ નમસ્કારવાળાને પણ, તેવા તેવા ઉત્કર્ષ સહિતના ભાવ નમસ્કાર હજુ અસિદ્ધ હોઈ તેની સાધના ન હોવી અસિદ્ધ છે. અર્થાત્ નમસ્કારનો ઉત્કર્ષ સાધ્ય હોઈ નમસ્કારની સાધના સુયોગ્ય છે." આ આ અંગેનો વધુ વિસ્તાર મારા (=ઉપા. શ્રી યશોવિજયજીના) **વિધિવાદ** વગેરે ગ્રન્થોમાંથી જોઈ લેવો. ॥૬૬॥

વૈયાવચ્ચ વગેરેની ઇચ્છાનો અવિચ્છેદ પણ યોગ્યતા વિના હિતાવહ નથી એવો ઉપદેશ આપતાં ગ્રન્થકાર કહે છે–

[વૈયાવચ્ચની ઇચ્છા યોગ્યતા વિના અહિતાવહ]

વૈયાવચ્ચાદિની ઇચ્છાનો અવિચ્છેદ (પરંપરા) પણ, તે વૈયાવચ્ચાદિનું આલંબન પ્રશસ્ત હોવા છતાં પણ (અહીં પણ [1]કાકાક્ષિન્યાય મુજબ 'અપિ' શબ્દનો સંબંધ જાણવો.) ઔચિત્ય વિના ભદ્રવાન્ નથી અર્થાત્ પરિણામે અવિલંબિત ફળ દેનાર નથી. (ભદ્ર શબ્દને મત્વર્થીય 'અ' પ્રત્યય લાગ્યો હોવાથી ભદ્ર એટલે જ ભદ્રવાન). અહીં આ તાત્પર્ય છે–આચાર્ય વગેરે વૈયાવચ્ચાદિ કરવાની ઇચ્છા રાખે અને વૈયાવચ્ચ કરનાર સાધુ અધ્યયન–અધ્યાપન (ભણવા–ભણાવવા) વગેરેની ઇચ્છા રાખે એ અત્યંત અનુચિત છે. કેમ કે 'આ વૈયાવચ્ચાદિ મારી કૃતિથી સાધ્ય છે (અર્થાત્) હું કરી શકું એમ છું" એવું કૃતિસાધ્યત્વજ્ઞાન વિપર્યસ્ત હોઈ તેનાથી થનારો પ્રવૃત્તિ પણ વિપર્યસ્ત(=વિસંવાદી) જ થાય છે અને વિપર્યસ્ત પ્રવૃત્તિ તો નિષ્ફળ જ હોય છે. તેથી આચાર્ય વગેરેએ પોતાને

---

૧. જેમ લોકમાં કહેવાય છે કે કાગડાને આંખનો ગોળો એક જ હોય છે જે બન્ને બાજુ ફરી બન્ને બાજુ રહેલા પદાર્થોનું દર્શન કરાવે છે. તેને કાકાક્ષિગોલકન્યાય કહે છે.

तम्हा गुरुपुच्छाए इहमहिगयजोग्गओ कुणउ ।
किच्चं अकए किच्चे वि फलं तीए इहरा फलाभावो ॥६८॥

(तस्माद्गुरुपृच्छया येनाधिगतयोग्यतं करोतु । कृत्यमकृते कृत्येऽपि फलं तयेतरथा फलाभावः ॥६८॥)

॥ निमंतणा सम्मत्ता ॥

तम्ह त्ति । तस्मात्=योग्यतानधिगमस्याऽश्रेयस्त्वात् गुरुपृच्छया=गुरुं प्रति निमन्त्रणानिवेदनेन अधिगता=ज्ञाता योग्यता=कर्त्तव्याऽकर्त्तव्यरूपा येन तादृशः सन् कृत्यं निमन्त्रणापूर्वकं परेषां वैयावृत्त्यं करोतु । ननु गुर्वाज्ञापेक्षायां तेन तत्कार्यनिषेधे कथं तन्निमित्तको लाभः ? इत्यत आह-अकृतेऽपि=अननुष्ठितेऽपि कृत्ये=वैयावृत्त्यादौ फलमिष्टसिद्धिस्तया=आज्ञया । नहि केवलं वैयावृत्त्यमिष्टसिद्धये,अपि त्वाज्ञापूर्वकम् । एवं चावश्यकत्वादाज्ञाया एव तथात्वमिति

અનધિકૃત પ્રવૃત્તિની ઇચ્છા કરવી ન જોઈએ. 'મારા ધૃતિબળ (સત્ત્વ–સાહસાદિ–વીલપાવર) થી હું ગમે તે રીતે પણ એ વૈયાવચ્ચાદિ કાર્યને પાર પાડીશ' એ રીતે કૃતિસાધ્યત્વજ્ઞાન કરીને પણ જે પ્રવૃત્તિ થાય એ વિપર્યસ્ત ન હોવા છતાં પણ શિથિલ તો જરૂર હોય જ છે, કેમ કે તે વખતે વૈયાવચ્ચ વગેરેનો આચાર્યાદિને કોઈ અભ્યાસ હોતો નથી. તેથી એ અંગેની પ્રવૃત્તિ દૃઢ ન થવાથી ફળ પણ અલ્પ જ મળવાની આપત્તિ ઊભી જ રહે છે. તેમજ એટલો વખત પોતાને જેનો અભ્યાસ અને અધિકાર છે એવા અધ્યયનાદિની જો પ્રવૃત્તિ કરી હોત તો એ પ્રવૃત્તિ દૃઢ થવાથી જે વિશિષ્ટ નિર્જરા થાય તે નિર્જરાનું નુકસાન થવાની પણ આપત્તિ આવે છે. તેથી સંયમયોગરૂપ એવા પણ વૈયાવચ્ચાદિની ઇચ્છા અનધિકારીએ કરવી યોગ્ય નથી. આ બાબતમાં આ દૃષ્ટાંત જાણવું જ્યારે સીધો અને વાંકો એમ બે માર્ગ હોય ત્યારે કયા માર્ગે જવાની ઇચ્છા હિતાવહ બને ? માત્ર માર્ગ રૂપે તો બન્ને તુલ્ય હોવા છતાં વક્રમાર્ગ પર જવાની ઇચ્છા કરી એ મુજબ પ્રવૃત્તિ કરવામાં ઇષ્ટદેશ પ્રાપ્તિ રૂપ ફળપ્રાપ્તિ વિલંબે થાય છે અને ઋજુમાર્ગ પર જવાની ઇચ્છાથી થએલ પ્રવૃત્તિથી (ઋજુમાર્ગે ગમન કરવાથી) તે ફળપ્રાપ્તિ વિના વિલંબે થાય છે. તેથી જેમ ઋજુમાર્ગની ઇચ્છા જ હિતાવહ છે તેમ બધા સંયમયોગો મોક્ષોપાય હોવા રૂપે તુલ્ય હોવા છતાં જે અંગે જેનો કુશળ અધિકાર હોય તે અંગે તેની ઇચ્છા વિલંબ વિના સિદ્ધિ કરવામાં સમર્થ હોઈ હિતાવહ છે. અન્ય અંગેની ઇચ્છા નહિ. ॥૬૭॥ આ વિચારણાનો ઉપસંહાર કરી નિમંત્રણાનો ઉપદેશ આપતાં ગ્રન્થકાર કહે છે—

આમ વૈયાવચ્ચ વગેરે પણ યોગ્યતા વિના અકલ્યાણકર હોઈ યોગ્યતાની અજ્ઞાનુકારી પણ અહિતકર છે. તેથી ગુરુને નિમન્ત્રણા વગેરેની પૃચ્છા કરવા દ્વારા કર્ત્તવ્ય–અકર્ત્તવ્યના વિવેકરૂપ યોગ્યતા જેણે જાણી હોય અને પોતાનામાં જોઈ હોય તેને જ બીજાઓની વૈયાવચ્ચ કરવી હિતાવહ છે.

શંકા : નિમન્ત્રણા વગેરે માટે ગુર્વાજ્ઞાની અપેક્ષા રાખવામાં તો નુકસાન છે, કેમકે કયારેક તેઓ ના પાડી દે તો એ નિમન્ત્રણાદિ નિમિત્તે થનાર લાભથી વંચિત રહેવાનું થાય. તેથી ગુરુને પૂછ્યા વિના જ નિમન્ત્રણાદિ કરી દેવા જોઈએ.

कथं नाज्ञामात्रात्फलसिद्धिः ? इतरथाऽऽज्ञां विना कृत्यकरणेऽपि फलाभावः=फलाऽसिद्धिः । तस्मादवश्यमाज्ञामश्रित्यैव निमन्त्रणा क्रियमाणा श्रेयसीति तत्त्वम् । तदाह-[पंचा-१२/४१]

१ इयरेसिं पक्खित्ते गुरुपुच्छाए णिओगकरणं ति । एयमिणं परिसुद्धं वेयावच्चं तु अकए वि ॥

इति । स्यादेतत् निमन्त्रणायामेव गुरुपृच्छाया उपयोगित्वात्कथमकृते वैयावृत्त्ये निमन्त्रणां विना गुरुपृच्छामात्रात्साध्यसिद्धिः ? इति चेत् ? सत्यम्, गुरुपृच्छाजनितभावोत्कर्षप्रयुक्तोत्कर्षशालिभावनिमन्त्रणायोगादेव तत्र फलसिद्धेः, द्रव्यनिमन्त्रणायां तु पृच्छामात्रादेवोपरमे भावसंकोच एवेति बोध्यम् ॥६८॥

---

१. व्यवहारोऽपि हु बलवान् यद्छद्मस्थमपि वन्दतेऽर्हन् । यावद् भवति अनभिज्ञातः जानन् धर्मकमेतत् ॥
२. व्यवहारस्येत्यर्थः ।

कथितस्य=उक्तस्य सेवनं श्रेयः=कल्याणावहम् । यत्काले व्यवहारप्रतिबद्धं कार्यमनुज्ञातं तत्काले तदेव कर्त्तव्यम्, यत्काले तु निश्चयप्रतिबद्धं तदा तदेव, यत्काले चोभयप्रतिबद्धं तदाऽपि तदेव, नत्वेकमात्रपक्षपातितया विपर्यासः कार्य इति परमार्थः । तेन=उक्तहेतुना कुत्रचित्=निश्चयादिप्रतिबद्धकार्यस्थले कस्यापि=व्यवहारादेः अग्रहणेऽपि=अनाश्रयणेऽपि दोषः=कर्मबन्धः न ज्ञातव्यः=न बोध्यः ॥ ९२ ॥ ज्ञानोपसंपद्विध्युक्त्या दर्शनोपसंपद्विधिरप्युक्त एवेति । सम्प्रति चारित्रोपसंपदमभिधित्सुराह—

चरणोवसंपया पुण वेयावच्चे य होइ खमणे य ।
सीयणमाइवसेणं गमणं पुण अण्णगच्छंमि ॥ ९३ ॥

(चरणोपसंपत्पुनर्वैयावृत्त्ये च भवति क्षपणे च । सीदनादिवशेन गमनं पुनरन्यगच्छे ॥९३॥)

चरणोवसंपयत्ति । चरणोपसंपत्=चारित्रोपसंपत् पुनः विशेषणे, किं विशेषयति ? द्वैविध्यं वैयावृत्त्ये च=वैयावृत्त्यनिमित्तं च क्षपणे च=क्षपणनिमित्तं च । ननु किमत्रोपसंपदा प्रयोजनम् ? स्वगच्छ एव वैयावृत्त्यं क्षपणं वा कुतो न क्रियते ? इति चेद् ? भण्यते सीदनं=साधुसामाचार्यां प्रमत्तता, मकारोऽत्राऽलाक्षणिकस्ततः सीदनमादिर्यस्य स्वकार्यक्षमा(?स्वकार्याऽक्षमक्षपका)न्तरशालिस्वगच्छप्रतिसंधानादेस्तद्वशेन=तत्तन्त्रतया अन्यगच्छे=स्वगच्छातिरिक्तगच्छे पुनर्गमनं भवति ॥ ९३ ॥ तत्र वैयावृत्त्योपसंपद्विषयिणीं व्यवस्थामाह—

ઉભયનયનો આશ્રય કરવો એવું જે કહ્યું તેનું તાત્પર્ય એ છે કે નિશ્ચય-વ્યવહાર સંમત અનુષ્ઠાનોનું સેવન પોતપોતાના સ્થાનમાં જ હિતાવહ છે. તેથી જે વખતે વ્યવહાર પ્રતિબદ્ધ કાર્યની અનુજ્ઞા હોય તે વખતે તે જ કર્ત્તવ્ય બને છે, એમ જે વખતે નિશ્ચય પ્રતિબદ્ધ કાર્યની અનુજ્ઞા હોય તે વખતે નિશ્ચયકાર્ય જ હિતાવહ બને છે. એ રીતે જે વખતે ઉભયપ્રતિબદ્ધ કાર્યની અનુજ્ઞા હોય તે વખતે ઉભયપ્રતિબદ્ધકાર્ય જ કલ્યાણકારી બને છે. માટે કોઈ એકના પક્ષપાતી બની વિપર્યાસ કરવો નહિ. તેથી કયાંક નિશ્ચયાદિપ્રતિબદ્ધ કાર્યસ્થળમાં વ્યવહારાદિરૂપ ઇતરનો આશ્રય કરવામાં આવ્યો ન હોય તો પણ કર્મબંધાદિ દોષ થતો નથી તે જાણવું. ॥ ૯૨ ॥

[ચારિત્રોપસંપદ્ના ભેદ]

જ્ઞાનોપસંપદ્ની વિધિ કહી. તેનાથી જ દર્શનોપસંપદ્ની વિધિ પણ કહેવાઈ ગએલી જાણવી. (કારણ કે બન્ને સમાન છે.) હવે ચારિત્રોપસંપદ્ને કહેવાની ઈચ્છાવાળા ગ્રન્થકાર કહે છે—

ચારિત્રોપસંપદ્ વૈયાવચ્ચ નિમિત્તે તેમજ ક્ષપણા(તપશ્ચર્યા) નિમિત્તે હોય છે.

પ્રશ્ન :- આ બે નિમિત્તે પણ ઉપસંપદ્ સ્વીકારવાની શી જરૂર છે ? પોતાના ગચ્છમાં જ વૈયાવચ્ચ કે ક્ષપણ કેમ નથી કરાતા ?

ઉત્તર :- સાધુ સામાચારીના પાલનમાં પ્રમાદ કરવા રૂપ સીદાવાપણું (તેમજ 'આદિ' શબ્દથી) પોતાના ગચ્છમાં પોતાની વૈયાવચ્ચ કરનાર સમર્થ વ્યક્તિના અભાવના કે બીજા કોઇ ક્ષપકની હાજરીના પ્રતિસંધાન વગેરે કારણે અન્ય ગચ્છમાં ઉપસંપદ્ સ્વીકારવી પડે છે. ॥ ૯૩ ॥

आगंतुगो य पुराणओ अ जइ दो वि आवकहियाओ ।
तो तेसु लद्धिमंतो ठप्पो इयरो अ दायव्वो ॥ ९४ ॥

(आगंतुकश्च पुराणकश्च यदि द्वावपि यावत्कथिकौ । तर्हि तयोर्लब्धिमान् स्थाप्य इतरश्च दातव्यः ॥९४॥)

अह दो वि लद्धिमंता दिज्जइ आगंतुओ च्चिय तया णं ।
तयणिच्छाए इयरो तयणिच्छाए अ तच्चाओ ॥ ९५ ॥

(अथ द्वावपि लब्धिमन्तौ दीयत आगंतुक एव तदा णम् ॥ तदनिच्छायामितरस्तदनिच्छायां च तत्त्यागः ॥९५॥)

इयरेसु वि भंगेसु एवं विवेगो तहेव खमणे वि ।
अविगिट्ठ विगिट्ठम्मि य गणिणा गच्छस्स पुच्छाए ॥ ९६ ॥

(इतरेष्वपि भङ्गेषु एवं विवेकस्तथैव क्षपणेऽपि । अविकृष्टविकृष्टे च गणिना गच्छस्य पृच्छया ॥९६॥)

आगंतुगो य त्ति । अह दोवि त्ति । इयरेसु त्ति । **आगन्तुकः**=आगमनशीलः **पुराणकः**=वास्तव्यश्च द्वावप्येतौ यदि यावत्कथिकौ=यावज्जीवं गुर्वन्तिकावस्थानबद्धमनोरथौ भवेयातां, तर्हि **तयोः**=द्वयोर्मध्ये लब्धिमान् स्थाप्यः=स्ववैयावृत्त्यं कारणीयः, इतरश्च=अलब्धिमांश्च दातव्य उपाध्यायस्थविरग्लानशैक्षकादीनामिति गम्यम् ; अत्र द्वयोः समाने एतद्विधिभणनाद् यद्याचार्यस्य समीपे कोऽपि वैयावृत्त्यकरो नास्ति तदाऽऽगन्तुकः सर्वोऽपि सर्वथेष्यत एवेति सामर्थ्याल्लभ्यते ॥ ९४ ॥

अथेति पक्षान्तरे, द्वावपि=आगन्तुकवास्तव्यौ यदि लब्धिमन्तौ तदाऽऽगन्तुक एवोपाध्यायादिभ्यो दीयते, वास्तव्यश्च स्थाप्यते, तदाशयस्य सम्यक्परिज्ञानात् , लब्धिमत्तया कार्यक्षमत्वाच्चेति भावः । णं इति वाक्यालंकारे । तयाणिं इति पाठोऽपि, तत्र तदानीमित्यर्थः । **तदनिच्छायां**=आगन्तुकस्योपाध्यायाद्यन्तिकगमनेच्छाविरहे **इतरः**=वास्तव्य एव प्रीतिपुरस्सरं

વૈયાવૃત્ત્યોપસંપદ્ વિષયક વ્યવસ્થા બતાવતાં ગ્રન્થકાર કહે છે–

આગંતુક અને વાસ્તવ્ય એ બન્ને જો યાવજ્જીવ માટે ગુરુ પાસે રહી વૈયાવચ્ચ કરવાના મનોરથવાળા હોય તો તે બેમાંથી જે લબ્ધિમાન હોય તેની પાસે આચાર્યે પોતાની વૈયાવચ્ચ કરાવવી અને બીજાને ઉપાધ્યાય–સ્થવિર–ગ્લાન–શૈક્ષકાદિ પાસે મૂકવો. આવા બન્ને વૈયાવચ્ચાર્થીની હાજરી હોય ત્યારની આ વાત કહી. આનાથી એ પણ જણાય છે કે આચાર્ય પાસે વૈયાવચ્ચ કરનાર જો કોઈ ન હોય તો તે આગંતુકને સર્વથા રાખી જ લેવો. ॥ ૯૪ ॥

જો આગંતુક અને વાસ્તવ્ય બન્ને લબ્ધિમાન હોય તો આચાર્યે વાસ્તવ્યને જ રાખવો, કેમકે તેની ચિત્તવૃત્તિઓ (સ્વભાવાદિ) સમ્યક્ જ્ઞાત હોય છે તેમજ લબ્ધિવાળો હોઈ તે પણ કાર્યક્ષમ તો છે જ. ઉપાધ્યાયાદિને આગંતુક સોંપવો. 'णं' શબ્દ વાક્યને અલંકૃત કરવા વપરાએલો છે તે જાણવું. અથવા 'तयाणिं' પાઠ લેવો. તેનો અર્થ– तदानीं=ત્યારે=બન્ને લબ્ધિમાન હોય ત્યારે. (વાસ્તવ્યને પોતે રાખવો ઇત્યાદિ.) જો આગંતુક સાધુ ઉપાધ્યાયાદિ પાસે રહેવા માંગતો ન હોય તો વાસ્તવ્યને જ પ્રેમપૂર્વક સમજાવી ઉપાધ્યાયાદિ પાસે રાખવો અને આગંતુક પાસે પોતાની વૈયાવચ્ચ કરાવવી,

दीयते, आगन्तुकश्च स्ववैयावृत्त्यं कार्यते । तदनिच्छायां=वास्तव्यस्याऽप्युपाध्यायाद्याश्रयानिच्छायां च तत्त्यागः=आगन्तुकविसर्गः ॥ ९५ ॥

इतरेष्वपि-अन्येष्वपि भङ्गेषु-संयोगेषु एवं-अनया रीत्या विवेकः-विशेषनिर्धारणं कर्त्तव्यम् । तथाहि-यदि वास्तव्यो यावत्कथिक आगन्तुकस्त्वितरस्तत्राप्येवमेव भेदाः, यावदागन्तुको विसृज्यते । विशेषस्तु वास्तव्य उपाध्यायादिवैयावृत्त्या(त्त्यम)निच्छन्नपि प्रीत्या विश्राम्यते । उक्तं च चूर्णौ-"आवकहिओ विस्सामिज्जइ" इति । यदि तु वास्तव्यः सर्वथा विश्रामणमपि नेच्छति तदाऽऽगन्तुको विसृज्यते । अथ वास्तव्य इत्वर आगन्तुकस्तु यावत्कथिकस्ततो वास्तव्योऽवधिकालं यावदुपाध्यायादिभ्यो दीयते, शेषं पूर्ववत् । अथ द्वावपीत्वरौ, तत्राप्येक उपाध्यायादिभ्यो दीयतेऽन्यस्तु स्ववैयावृत्त्यं कार्यते, शेषं पूर्ववत्, अन्यतमो वाऽवधिकालं यावद् म्रियत इत्येवं यथाविधि कर्त्तव्यम् ।

उक्ता वैयावृत्त्योपसंपद्, संप्रति क्षपणोपसंपदुच्यते-क्षपकश्च द्विविधः, इत्वरो यावत्कथिकश्च । तत्र यावत्कथिक उत्तरकालेऽनशनकर्त्ता । इतरस्तु द्विविधः विकृष्टक्षपकोऽविकृष्टक्षपकश्च । तत्राष्टमादिक्षपको विकृष्टक्षपकः, चतुर्थषष्ठक्षपकस्त्वविकृष्टक्षपकः । तत्र चायं विवेकः-अविकृष्टक्षपकः खल्वाचार्येण पृच्छ्यते-हे आयुष्मन् ! पारणके त्वं कीदृशो भविष्यसि ? स प्राह-

---

વાસ્તવ્ય પણ જો ઉપાધ્યાયાદિ પાસે રહેવા ન જ ઇચ્છે તો આગંતુકને રજા આપી દેવી. ॥ ૯૫ ॥

બીજા ભાંગાઓમાં પણ આ રીતે જ વિશેષ નિર્ધારણ કરવું. તે આ રીતે-જો વાસ્તવ્ય યાવજ્જીવ માટે હોય અને આગંતુક અલ્પકાળ માટે કામચલાઉ આવ્યો હોય તો આગંતુકને રજા આપવા સુધીનો આ જ ક્રમ જાણવો. ફેર એટલો કે વાસ્તવ્ય સાધુ જો ઉપાધ્યાયાદિની વૈયાવચ્ચ કરવા ઇચ્છતો ન હોય તો તેને પ્રીતિથી સમજાવી એટલો કાળ આરામ કરાવવો. ચૂર્ણિમાં પણ કહ્યું છે કે 'યાવત્કથિક એવા વાસ્તવ્યને વિશ્રામ કરાવવો.' જો વાસ્તવ્ય સાધુ કોઈપણ રીતે વિશ્રામ કરવા પણ ન જ ઇચ્છે તો આગંતુકને રજા આપવી.

જો વાસ્તવ્ય અલ્પકાળ માટે હોય અને આગંતુક યાવત્કથિક હોય તો વાસ્તવ્યને તેના નિયતકાળ માટે ઉપાધ્યાયાદિ પાસે મૂકવો, બાકી બધું પૂર્વવત્. એમ જો બન્ને ઈત્વર (અલ્પકાલીન) હોય તો એમાંથી એકને ઉપાધ્યાયાદિની સેવામાં ગોઠવવો અને બીજાને પોતાની સેવામાં. બાકી બધું પૂર્વવત્ અથવા એમાંથી એકને બીજાના અવધિકાળ સુધી વિશ્રામ કરાવવો.

[ક્ષપકોપસંપદ્]

વૈયાવૃત્ત્યોપસંપદ્ સંબંધી વિધિ કહ્યો. હવે **ક્ષપકોપસંપદ્** :-ક્ષપક બે પ્રકારના હોય છે ઈત્વર અને યાવત્કથિક. આગળ ઉપર જેઓ અનશન કરવાના હોય તે યાવત્કથિક. તે સિવાયના ઈત્વર. ઈત્વરના પણ બે પ્રકાર છે-(૧) વિકૃષ્ટક્ષપક-અઠ્ઠમ કે તેથી વધુ તપ કરનાર અને (૨) અવિકૃષ્ટક્ષપક-ઉપવાસ કે છઠ્ઠ કરનાર. આ બાબતમાં આવો વિવેક કરવો જોઈએ. અવિકૃષ્ટ ક્ષપકને આચાર્યએ પૂછવું કે-હે આયુષ્મન્ ! તું

ग्लानोपम इति । तदा स प्रतिषेद्धव्यः 'अलं तव क्षपणेन' इति 'स्वाध्यायवैयावृत्त्यादावेव यत्नं कुरु' इति चाभिधातव्यः । विकृष्टक्षपकोऽप्येवमेव प्रज्ञाप्यते । अन्ये तु व्याचक्षते—विकृष्टक्षपकपारणककाले ग्लानकल्पतामनुभवन्नपीष्यत एव । यस्तु मासादिक्षपको यावत्कथिको वा स इष्यते । अयं च विवेकः गणिना=गच्छेशेन गच्छस्य पृच्छया कार्यः । तथा हि—प्राग्-अभिहितकार्य आचार्येण गच्छः प्रष्टव्यः 'यथाऽयं क्षपकस्तप उपसंपद्यते' इति । अनापृच्छायां तु सामाचारीविराधना, यतस्तेऽसन्दिष्टा उपधिप्रत्युपेक्षणादि तस्य न कुर्वन्तीति । अथ पृष्टा ब्रुवते यथा—'अस्माकमेकः क्षपकोऽस्त्येव तस्य क्षपणपरिसमाप्तावस्य वैयावृत्त्यं करिष्यामः' इति, ततोऽसौ विलम्बं कार्यते । यदि नेच्छन्ति सर्वथा ततोऽसौ त्यज्यते । अथ गच्छो विशिष्टनिर्जरार्थितया तमप्यनुवर्त्तते ततोऽसाविष्यत एव । तस्य च विधिना प्रतीच्छितस्य कार्यं प्रमादतोऽनाभोगतो वा यदि न कुर्वन्ति तदा गणिना ते सम्यक् प्रेरणीयाः । उपसंपत्ताऽपि यद्युपसंपदः कारणं वैयावृत्त्यादिकं न पूरयति तदा तस्य सारणा क्रियते । अत्यविनीतस्य समाप्तोपसंपदो वा विसर्ग एव क्रियते । उक्तं च—

[1]उवसंपन्नो जं कारणं तु तं कारणं अपूरंतो । अहवा समाणियम्मी सारणया वा विसग्गो वा ॥

[आव० नि० ७२०] इत्ययं विवेकः ॥ ९६ ॥ उक्ता साधूपसंपत्, अथ गृहस्थोसंपदमाह—

પારણા વખતે કેવો હશે? (અર્થાત્ એ વખતે તારી શક્તિ-સ્વસ્થતા-ધીરજ વગેરે કેવા હશે?) જો તે કહે કે 'ગ્લાન જેવો' (ઢીલો ઘેંસ) તો તેને નિષેધ કરવો કે 'ભાઇ! તું તપ કરવો રહેવા દે. સ્વાધ્યાય-વૈયાવચ્ચાદિમાં જ ઉદ્યમ કર.' ઇત્યાદિ કહેવું. વિકૃષ્ટ-ક્ષપકને પણ આજ રીતે પ્રશ્નાદિ કરવા.

બીજા આચાર્યો કહે છે કે "વિકૃષ્ટક્ષપક પારણા વખતે માંદા જેવો બની જતો હોય તો પણ તેને ઉપસંપદ્ આપીને સ્વીકારવો, તપ કરાવવો". જે માસક્ષમણાદિ તપ કરનાર હોય કે યાવત્કથિક તપ કરનાર હોય તે તો ગ્લાન જેવો બની જતો હોય તો પણ સ્વીકારવો જ. છતાં ગચ્છના આચાર્યએ ગચ્છને પૂછવા દ્વારા આટલો વિવેક તો કરવો જ જોઈએ—પહેલાં તપસ્વી અંગે આચાર્યે ગચ્છને પૂછવું કે 'આ ક્ષપક તપની ઉપ-સંપદા સ્વીકારે છે' ઇત્યાદિ. આચાર્ય જો ગચ્છને આ પૂછે નહિ તો સામાચારીની વિરાધના થાય, કેમકે નહિ જણાવાએલા તે સાધુઓ ક્ષપકની ઉપધિનું પડિલેહણ વગેરે કરે નહિ. સાધુઓને પૂછવામાં જો તેઓ એવું કહે કે 'આપણે ત્યાં અત્યારે એક ક્ષપક તો છે જ, તેથી એનો તપ પૂરો થયા પછી આ નવાની વૈયાવચ્ચ કરીશું' તો નવાને તપમાં વિલંબ કરાવવો. જો સાધુઓ પૂર્વક્ષપકની વૈયાવચ્ચ વગેરે કારણે આ નવા આગંતુકની વૈયાવચ્ચ કરવા સર્વથા ઇચ્છતા ન હોય તો (અથવા જો કોઈ પણ રીતે વિલંબ કરવા તે ક્ષપક તૈયાર જ ન હોય તો) તે નવાક્ષપકને રજા આપવી. ગચ્છ જો વિશિષ્ટનિર્જરાર્થી હોય અને બીજાની વૈયાવચ્ચ કરવાની તૈયારી બતાવે તો એને પણ સ્વીકારવો જ. આ રીતે વિધિપૂર્વક સ્વીકારાયેલા તેનું પડિલેહણાદિ કાર્ય ગચ્છના સાધુઓ જો પ્રમાદથી કે અનાભોગથી ન કરે તો આચાર્ય તેઓને સમ્યક્ પ્રેરણા કરે.

---

१. उपसंपन्नो यत्कारणं तु तत्कारणमपूरयन् । अथवा समाप्ते सारणया वा विसर्गो वा ॥

खणमवि मुणीण कप्पइ णेव अदिन्नोग्गहस्स परिभोगो ।
इयराऽजोगे गेज्झो अवग्गहो देवयाए वि ॥ ९७ ॥

(क्षणमपि मुनीनां कल्पते नैवादत्तावग्रहस्य परिभोगः । इतरायोगे ग्राह्योऽवग्रहो देवताया अपि ॥९७॥)

खणमवि त्ति । क्षणमपि मुनीनामदत्तावग्रहस्य परिभोगस्तत्र स्थानोपवेशनादिरूपो न कल्पते, तृतीयव्रतातिक्रमप्रसंगात् । तदुक्तम्—

[1]इत्तरियंपि न कप्पइ अविदिन्नं खलु परोग्गहाइसु । चिट्ठित्तु णिसीइत्तु च तइयव्वयरक्खणट्ठाए ॥

[आव० नि० ७२१] इति । एवं च भिक्षाटनादावपि व्याघातः संभवेत् । क्वचित्स्थातुकामेन स्वामिनमनुज्ञाप्य विधिना स्थातव्यम् । अटव्यादावपि विश्रामितुकामेन पूर्वस्थितमनुज्ञाप्य स्थातव्यम् । तदभावे त्वाह—इतरस्य=पूर्वस्थितस्यापि अयोगे=असंबन्धे देवतायाः=तदधिष्ठात्र्या अप्यवग्रहो ग्राह्यः=याचितव्यः 'अणुजाणओ (ह) जस्सुग्गहो' इति । उक्तं च चूर्णौ—'णत्थि ताहे अणुयाणओ देवता जस्सोग्गहो एसो' इति ॥ ९७ ॥

तदेवं विवृतोपसंपत्सामाचारी, तथा चोक्ता दशापि विधाः । अथोपसंहरति—

एवं सामायारी कहिया दसहा समासओ एसा ।
जिणआणाजुत्ताणं गुरुपरतंताण साहूणं ॥ ९८ ॥

(एवं सामाचारी कथिता दशधा समासत एषा । जिनाज्ञायुक्तानां गुरुपरतन्त्राणां साधूनाम् ॥९८॥)

એમ ઉપસંપદ્ સ્વીકારનાર જો ઉપસંપદ્ના કારણભૂત જ્ઞાનનું ગ્રહણ, વૈયાવચ્ચ, તપ વગેરે કરતો ન હોય તો તેની પણ સારણા કરવી-હિત શિક્ષાના શબ્દો કહી એ કરવામાં ઉદ્યત બનાવવો. જો એ અત્યંત અવિનીત હોય અથવા તો એની ઉપસંપદ્ પૂરી થઈ ગઈ હોય તો તેને છૂટો કરવો. કહ્યું છે કે "જે કારણે ઉપસંપન્ન થયો હોય તે કારણને જો ન જાણવતો હોય તો પ્રેરણાથી એ કારણ સફળ કરાવવું. નહિતર તેનો ત્યાગ કરવો. અથવા કારણ પૂરું થઈ ગયું હોય તો એને છુટો કરવો." ઉપસંપદ્ સંબંધી આ બધો વિવેક જાણવો. ॥૯૬॥ સાધુ ઉપસંપદ કહી, હવે ગૃહસ્થોસંપદ્ કહે છે—

[गृहस्थोसंपद्]

માલિક વડે નહિ અપાએલ અવગ્રહનો, ત્યાં ઊભા રહેવા-બેસવા વગેરે રૂપ પરિભોગ એક ક્ષણ માટે પણ કરવો સાધુઓને કલ્પતો નથી, કેમકે એમાં ત્રીજા મહાવ્રતનું ઉલ્લંઘન થઈ જાય છે. કહ્યું છે કે "ત્રીજા વ્રતના રક્ષણ માટે માલિકથી નહિ અપાયેલ પરાવગ્રહાદિમાં અલ્પકાળ માટે કાઉસ્સગ કરવો કે બેસવું કલ્પતું નથી." ભિક્ષા વગેરેકરવામાં કયારેક થાક વગેરે રૂપ વ્યાઘાત થાય તો સ્વામીની અનુજ્ઞા લઇને જ મકાનની છત નીચે વગેરે સ્થળોએ વિધિપૂર્વક ઊભા રહેવું. જંગલ વગેરેમાંથી પસાર થતી વખતે વિશ્રામ કરવાની ઇચ્છાવાળા સાધુએ, જો કોઈ પહેલાં આવીને ત્યાં રહેલ હોય તો એની અનુજ્ઞા લેવી, અને એવી કોઇ વ્યક્તિ જો ન હોય તો તે સ્થાનના અધિષ્ઠાયક દેવતાનો અવગ્રહ 'अणुजाणओ(ह) जस्सुग्गहो' શબ્દથી યાચી લેવો. ચૂર્ણિમાં કહ્યું છે કે "જો કોઇ ઊભું ન હોય તો અણુજ્જાણુઓ જસ્સુગ્ગહો શબ્દથી દેવતાની અનુજ્ઞા લેવી" ॥૯૭॥

१, इत्वरिकमपि न कल्पतेऽदत्तं खलु परावग्रहादिषु । स्थातुं निषीदितुं च तृतीयव्रतरक्षणार्थम् ॥

एवं ति । **एवं**=अनया रीत्या **एषा**=प्रत्यक्षा दशधा सामाचारी **समासतः**=शब्दसंक्षेपतः **कथिता**=निरूपिता । केषामेषा संभवति ? इत्याह-**जिनाज्ञायुक्तानां**=भगवदुक्तविधिपरायणानां **गुरुपरतन्त्राणां**=गुरुवशवर्त्तिनां साधूनां भवति ॥ ९८ ॥

अथ कीदृशस्येयमैकान्तिकात्यन्तिकफलहेतुः ? इत्याह—

अज्झप्पज्झाणरयस्सेसा परमत्थसाहणं होइ ।
मग्गम्मि चेव गमणं एयगुणस्सणुवओगेऽवि ॥ ९९ ॥

(अध्यात्मध्यानरतस्यैषा परमार्थसाधनं भवति । मार्गे चैव गमनमेतद्गुणस्यानुपयोगेऽपि ॥९९॥)

अज्झप्पत्ति । ' अध्यात्मध्यानरतस्य ' = अन्तर्भावितध्यातृध्येयभावेनात्मनैव परापेक्षाबहिर्मुखे स्वस्वरूपे ध्यानमात्रनिष्ठां प्राप्तस्य **एषा**=सामाचारी **परमो**=धर्मार्थकामापेक्षयोत्कृष्टोऽर्थः=पुरुषार्थो मोक्षलक्षणस्तत्साधनं=तद्धेतुर्भवति । स्वप्रयोज्यशुक्लध्यानातिशयरूपाध्यात्मध्यानद्वारा तस्या मोक्षहेतुत्वमिति भावः । ननु सामाचारीनिरतस्याप्यनाभोगतोऽपि कर्मबन्धसंभवात् कथमकर्मताभिमुखं तद्ध्यानम् ? अत आह-**मार्ग एव**=मोक्षपथ एव रत्नत्रयसाम्राज्यलक्षणे **गमनं**=अभिमुखः परिणाम **एतद्गुणस्य**=उक्तसामाचारीपरिणामशालिनः **अनुपयोगेऽपि**=अनाभोगेऽपि भवति । यस्य हि यत्र कर्मणि नैरन्तर्येणाभ्यासस्तस्य दृढसंस्कारवशादनुपयोगेऽपि तत्र प्रवृत्तिर्दृष्टचरैवेति न किञ्चिदनुपपन्नम् । तदिदमुक्तं **ललितविस्तरायाम्**-"अनाभोगतोऽपि मार्गगमनमेव :सदन्धन्यायेनेत्यध्यात्मचिन्तका इति, तत्र तथा प्रवृत्तिर्योगजादृष्टमहिम्नैवेति योगभावितमतयः" ॥ ९९ ॥

આમ ઉપસંપત્સામાચારીનું વિવરણ કર્યું. તેથી દશે પ્રકારની સામાચારીનું વિવરણ પૂરું થયું. હવે ઉપસંહાર કરતાં ગ્રન્થકાર કહે છે—

આમ દશધા સામાચારીનું સંક્ષેપથી નિરૂપણ કર્યું. આ સામાચારી જિનોક્ત વિધિમાં પરાયણ તેમજ ગુરુને આધીન રહેનારા સાધુઓને પાળવાની હોય છે. ॥૯૮॥

આ સામાચારીનું પાલન કેવા સાધુને એકાન્તિક અને આત્યન્તિક ફળ આપે છે ? એવા પ્રશ્નનનો જવાબ આપતાં ગ્રન્થકાર કહે છે—

અધ્યાત્મધ્યાનમાં રત બનેલા સાધુને આ સામાચારી પરમાર્થનું કારણ બને છે. અહીં અધ્યાત્મધ્યાનરત એટલે તેવા સાધુ કે જેઓ ધ્યાતા-ધ્યેયના અભેદ ભાવના કારણે આત્માથી જ પરાપેક્ષા રહિતપણે સ્વસ્વરૂપ વિશે ધ્યાનમાત્રમાં નિષ્ઠા પામેલ હોય. તેમજ પરમાર્થ એટલે ધર્મ-અર્થ-કામની અપેક્ષાએ પરમ=ઉત્કૃષ્ટ અર્થરૂપ મોક્ષ પુરુષાર્થ. આ દશધા સામાચારી શુકલધ્યાનના અતિશયરૂપ અધ્યાત્મધ્યાન દ્વારા મોક્ષહેતુ બને છે.

શંકા-સામાચારીમાં રત બનેલા સાધુને પણ અનાભોગથી પણ કર્મબંધ થઈ જવો સંભવે છે. તો તેનું ધ્યાન કર્મશૂન્ય અવસ્થારૂપ મોક્ષને અભિમુખ શી રીતે બને ?

સમાધાન-ઉક્ત સામાચારી પાલનના પરિણામવાળા સાધુનું, અનુપયોગ દશામાં પણ રત્નત્રય સામ્રાજ્ય રૂપ મોક્ષ માર્ગમાં જ ગમન થાય છે. જે વ્યક્તિને જે કાર્યનો દૃઢ અભ્યાસ હોય તેણે અનુપયોગ અવસ્થામાં પણ દૃઢ સંસ્કારવશ તે કાર્ય અંગેની પ્રવૃત્તિ ચાલુ જ હોય છે એ પ્રત્યક્ષ સિદ્ધ છે. તેથી કોઈ અનુપપત્તિ નથી. **ललित विस्तरा**માં પણ કહ્યું છે કે-અનાભોગથી પણ **सदन्धन्याय** મુજબ માર્ગગમન જ થાય છે. જેમ કોઈ

तदिह सामाचारीं निरूप्यैकान्तहितावहतया भावमात्रप्रवृत्तये उपदेशसर्वस्वमाह—

किं बहुणा इह जह जह रागदोसा लहुं विलिज्जंति ।
तह तह पयट्टिअव्वं एसा आणा जिणिंदाणं ॥ १०० ॥

(किं बहुनेह यथा यथा रागद्वेषौ लघु विलीयेते । तथा तथा प्रवर्त्तितव्यमेषाऽऽज्ञा जिनेन्द्राणाम् ॥१००॥)

किं बहुण त्ति । बहुना=भूयोभाषितेन किम् ? तद्धि मिथो धर्मकथायामेवोपयुज्यते, न तु स्वल्पसारज्ञानमूलप्रवृत्तय इति तत्र तदुद्वेजकतया नात्यन्तोपयुक्तमुपदेशकर्म । अलङ्कर्मीणानां च स्वल्पसारोपदेशोपनिषद्भूतः "मितं च सारं च वचो हि वाग्मिता" इति वचनात् । तदेवं प्रस्तावनां विधायोपनिषदुपदेशमेवाह—**तथा तथा**=तेन तेन प्रकारेण **प्रवर्तितव्यं** =उद्यमवता भाव्यमिह=जगति यथा यथा=येन येन प्रकारेण रागद्वेषौ मायालोभक्रोधमानरूपौ **विलीयेते**=क्षयं गच्छतः । न ह्यत्र कश्चिदेकान्तोऽस्ति यत्प्रतिनियत एव कर्मणि प्रवर्त्तितव्यमिति, किन्त्वयमेवैकान्तः यद्रागद्वेषपरिक्षयानुकूल्येनैव प्रवर्त्तितव्यमिति । अत एव तद्भावाभावाभ्यामनुज्ञानिषेधयोरपि परावृत्तिः । तदुक्तम्—[उपदेशमाला—३९२]

આંધળો કુદરતી રીતે શુભ અદૃષ્ટથી પ્રેરાઈને માર્ગ પર જ આવી ચડવાથી જોઈને ચાલતો ન હોવા છતાં માર્ગ પર જ ચાલે છે તેમ આવા જીવોને અભ્યાસના કારણે મોક્ષમાર્ગ જ હાથમાં આવી ચડતો હોવાથી અનુપયોગ દશામાં પણ માર્ગગમન જ થાય છે એવું અધ્યાત્મચિંતકો કહે છે. જ્યારે યોગભાવિત બુદ્ધિવાળાઓ (યોગના પક્ષપાતીઓ)નું કહેવું એ છે કે ઉપયુક્ત દશામાં સામાચારી પાલનાદિ રૂપ કરેલ યોગથી ઉત્પન્ન થએલ અદૃષ્ટનો જ એ મહિમા છે કે તેઓનું અનાભોગ દશામાં પણ માર્ગગમન જ થાય છે." ॥९९॥

[રહસ્યભૂત ઉપદેશ]

આમ અહીં સામાચારીનું નિરૂપણ કરી એકાન્તે હિતાવહ એવી ભાવમાત્ર પ્રવૃત્તિ માટે સારભૂત ઉપદેશ આપતાં ગ્રન્થકાર કહે છે—

આ અંગે વધારે બોલવાથી સર્યું. કેમકે એ વધારે બોલવું એ તો પરસ્પર ધર્મકથામાં જ ઉપયોગી છે, નહિ કે થોડા પણ સારયુક્ત જ્ઞાનવડે થતી પ્રવૃત્તિમાં પણ. તેથી સ્વલ્પસારયુક્ત જ્ઞાનમૂલક પ્રવૃત્તિમાં વધુ બોલવું એ શ્રોતાઓને ઉદ્વેગ કરાવનાર હોઈ અનુપયોગી છે. વળી "પરિમિત અને સારયુક્ત વચન બોલવું એ જ વાગ્મિતા= કુશળવક્તૃત્વ છે" એવા વચનથી જણાય છે કે જેઓ સ્વહિતાદિ સમજવા કે કરવા રૂપ કાર્ય કરવામાં સમર્થ હોય છે તેઓને તો સ્વલ્પ પણ સારભૂત ઉપદેશ જ ઉપનિષદ્ભૂત બની જાય છે. આમ પ્રસ્તાવના કરીને ઉપનિષદ્ભૂત ઉપદેશ જ કહે છે—'આ જગતમાં તે તે રીતે પ્રવૃત્તિ કરવી કે જે જે રીતે માયા લોભ રૂપ રાગ અને ક્રોધમાન રૂપ દ્વેષ વિલીન થતા જાય. એવો કોઈ આગ્રહ નથી કે અમુક ચોક્કસ અનુષ્ઠાનમાં જ પ્રયત્ન કરવો. એકાન્ત તો એ જ છે કે હંમેશ રાગદ્વેષની હાનિને અનુકૂળ પ્રવૃત્તિ જ કર્યા કરવી.' તેથી જ એ હાનિની હાજરી-ગેરહાજરીને આશ્રીને, એની એ પ્રવૃત્તિના અનુજ્ઞા-નિષેધ બદલાઇ જાય છે. અર્થાત્ સામાન્યથી નિષેધ કરાએલ પ્રવૃત્તિ પણ અવસર વિશેષમાં રાગહાનિને અનુકૂળ બની જાય તો અનુજ્ઞાત થઈ જાય છે અને એમ સામાન્યતઃ અનુજ્ઞાત પ્રવૃત્તિ પણ જો કયારેક રાગહાનિને પ્રતિકૂળ બની જતી હોય

तम्हा सव्वाणुन्ना सव्वणिसेहो य पवयणे नत्थि । आयं वयं तुलिज्जा लाहाकंखि व्व वाणियओ ॥ इति ।

नन्वेवमाज्ञाभङ्गः ? इत्यत आह-एषा =" रागद्वेषपरिक्षयार्थमेव प्रयतितव्यमि "त्याकारा-ऽऽज्ञा प्रवक्तृवाक्यरूपा जिनेन्द्राणां=तीर्थकृतां, सर्वस्य ग्रन्थप्रपञ्चस्यैतदुद्देशेनैव प्रवृत्तेरिति दिग् ॥ १०० ॥

एवं सामाचारीनिरूपणद्वारेण भगवन्तं वर्धमानस्वामिनं स्तुत्वा तत्समाप्तिं निवेदयन् स्वामिनं फलं प्रार्थयमानो रचनागर्भितं स्वनामाविष्कुर्वन्नाह—

इय संथुओ महायस जगबंधव वीर ! देसु मह बोहिं ।
तुह थोत्तेण धुवच्चिय जायइ जसविजयसंपत्ती ॥१०१॥

(इति संस्तुतो महायशो ! जगद्बान्धव ! वीर ! देहि मम बोधिम् ।
तव स्तोत्रेण ध्रुवैव जायते यशोविजयसंपत्तिः ॥ १०१ ॥)

इय त्ति । इति=अमुना प्रकारेण **संस्तुतः** स्तुतिगोचरं नीतो हे वीर ! हे **महायशो**= निरुपमकीर्त्ते ! हे जगद्बान्धव ! जगतो भव्यलोकस्य हितप्रवर्त्तकाऽहितनिवर्त्तकतया बान्धव इव बान्धवस्तस्यामन्त्रणं **मह** इति मम **बोधिं**=सम्यक्त्वं **देसु** इति देहि । ऐहिकसंपत्तिस्तु तद्भवनादन्तराऽवश्यं भाविनीत्याह-**तव स्तोत्रेण**=भवतः स्तवनेन **ध्रुवैव**=निश्चितैव **जायते**=संपद्यते **यशः**=पाण्डित्यादिप्रथा **विजयश्च**=सर्वातिशयलक्षणस्तयोः **संपत्तिः**=संपत्, ताभ्यामुपलक्षिता संपत्तिरैश्वर्यादिलक्षणा वा । यथा खल्वजरामरभावार्थं पीयूषपानप्रवृत्तावान्तरालिकं तापोपशमादिकमावश्यकमेव तथा बोध्यर्थं भगवद्गुणगानप्रवृत्तावान्तरालिकमैहिकसुखं ध्रुवप्राप्तिकमिति भावः । अत्र 'यशोविजयः' इति ग्रन्थकृता स्वनामप्रकटीकृतम् ॥१०१॥

તો એ વખતે તે નિષિદ્ધ બની જાય છે. કહ્યું છે કે "તેથી શ્રી જિનપ્રવચનમાં કોઇની સર્વથા અનુજ્ઞા કે સર્વથા નિષેધ નથી, કિન્તુ લાભાકાંક્ષી વાણિયાની જેમ આય (ગુણનો લાભ) અને વ્યય (ગુણની હાનિ)ની તુલના કરીને પ્રવૃત્તિ કરવી."

શંકા :- પણ જેની શ્રી જિનેશ્વરોએ અનુજ્ઞા આપી છે એનો પણ અવસ્થા વિશેષમાં રાગવર્ધક જાણીને જો નિષેધ કરાય તો એમાં રાગવૃદ્ધિ રૂપ દોષથી બચવાનું થવા છતાં આજ્ઞાભંગરૂપ દોષથી લેપાવાનું તો ઉભું જ રહેશે ને !

સમાધાન :- 'રાગદ્વેષની હાનિ માટે જ સદા પ્રયત્નશીલ રહેવું" એ પણ શ્રી તીર્થંકરદેવોની પ્રધાન આજ્ઞા જ છે. કેમકે બધા ગ્રન્થોનો વિસ્તાર પણ આ હાનિના ઉદ્દેશથી જ પ્રવર્ત્તેલો છે. માટે તેની હાનિને અનુકૂળ કોઇપણ પ્રવૃત્તિ આજ્ઞાવિરુદ્ધ નથી. ॥ ૧૦૦ ॥

હે મહાયશ ! હેવીર ! હે જગદ્બાંધવ ! (ભવ્યજીવો રૂપી જગત્ને હિતમાં પ્રવર્ત્તાવનારા હોવાથી તેમાં જ અહિતમાંથી પાછા ફેરવનારા હોવાથી બાંધવ જેવા બાંધવ) મને બોધિ આપો. ઐહિક સંપત્તિ તો તે બોધિ થવાથી વચમાં અવશ્ય થઇ જ જવાની છે એવું જણાવવા કહે છે-તારું સ્તવન કરવાથી યશ અને વિજયની સંપત્તિ મળે છે અથવા યશ અને વિજયથી ઉપલક્ષિત થએલ ઐશ્વર્યાદિરૂપ સંપત્તિ મળે છે.

---

१ तस्मात्सर्वानुज्ञा सर्वनिषेधश्च प्रवचने नास्ति । आयं व्ययं तोलयेत् लाभाकाङ्क्षीव वणिग् ॥

॥ अथ प्रशस्तिः ॥

सप्ताम्भोधितटीनटीहृतरिपुस्त्रीनेत्रनीरद्रवत्-
तद्वक्षोजतटीपटीरपटलीशोषिप्रतापोष्मणः ।
येषां कीर्त्तिरकब्बरक्षितिपतेर्नृत्यं पुरो निर्ममे,
श्रीमन्तः स्म जयन्ति हीरविजयास्ते सूरिपञ्चाननाः ॥१॥
वादाम्भोधिरशोषि पोषितदृढस्याद्वादवाचां महान्
येषां वाडवतेजसापि न जगद्विख्यातविद्याभृताम् ।
श्रीहीरप्रभुपट्टनन्दनवनप्रत्यक्षकल्पद्रुमाः
सूरिश्रीविजयादिसेनगुरवो रेजुर्जगद्वन्दिताः ॥२॥
वृद्धं चारुमरुत्प्रसंगवशतश्चित्रं ययौ यत्तप-
स्तेजः कल्मशकक्षदाहपटुतामाचाम्लनीरैरपि ।
सूरिश्रीविजयादिदेवगुरवो राजन्ति ते सत्तदा-
म्नायन्यायनिधानमानसलसद्ध्यानप्रधानप्रथाः ॥३॥
आदत्ते न कुमारपालतुलनां किं धर्मकर्मोत्सवै-
र्यच्चातुर्यचमत्कृतः प्रतिदिनं श्रीचित्रकूटेश्वरः ।

અહીં યશ એટલે પાંડિત્ય વગેરેની પ્રસિદ્ધિ અને વિજય એટલે બધા કરતાં ચઢિયાતા-પણું. જેમ અજરામરપણું પામવા માટે કરાતી અમૃતપાનની ક્રિયામાં વચ્ચે તાપની શાંતિ વગેરે અવશ્ય થઇ જ જાય છે તેમ સમ્યક્ત્વ માટે ભગવાનના ગુણગાનની પ્રવૃત્તિ કરવામાં વચ્ચે ઐહિક સુખ તો અવશ્ય પ્રાપ્ત થઇ જ જાય છે. અહીં **'यशोविजय'** શબ્દથી ગ્રન્થકારે સ્વનામ પ્રકટ કર્યું છે. ॥ ૧૦૧ ॥

[પ્રશસ્તિ]

જેના પ્રતાપની ગરમી, હણાએલા શત્રુઓની સ્ત્રીઓના આંસુઓથી ભીનું થએલ જે તેઓના સ્તન પર રહેલ વસ્ત્રપટલ તે વસ્ત્રપટલને સૂકાવનાર છે તેવા અકબર રાજાની આગળ સાત સમુદ્રના કિનારાઓ પર નૃત્ય કરનાર નટી જેવી જેમની કીર્ત્તિએ, નૃત્ય કર્યું તે સૂરિસિંહ **શ્રી હીરવિજયસૂરિ** મહારાજ વિશ્વમાં જય પામી ગયા.॥૧॥

જગદ્વિખ્યાત પંડિતોના વડવાનલથી પણ, પુષ્ટ અને દૃઢ સ્યાદ્વાદ યુક્ત વાણી વાળા એવા જેઓનો વાદસમુદ્ર સૂકાયો નહિ તે, શ્રી હીરસૂરિ મહારાજની પાટ રૂપ નંદનવનમાં કલ્પવૃક્ષ સમાન અને આખા જગત્થી વંદાએલા એવા ગુરુ **શ્રી વિજયસેનસૂરિ** મહારાજ શોભ્યા. ॥ ૨ ॥

સુંદર પવનસંગના કારણે (સુંદર દેવતાઓએ કરેલ પ્રકૃષ્ટ સંગના કારણે) વધેલ જેઓના તપનું તેજ (અગ્નિ) આયંબિલરૂપ પાણીથી પણ કર્મસમૂહનો દાહ કરવામાં કુશળ બન્યું તે, તેઓની (શ્રી સેનસૂરિ મહારાજની) પરંપરામાં ન્યાયના નિધાનભૂત એવા મનમાં વિલસતા ધ્યાનથી મુખ્ય પ્રસિદ્ધિ છે જેઓની એવા ગુરુ **શ્રી વિજયદેવસૂરિ** મહારાજ જગત્માં શોભે છે. ॥ ૩ ॥

तत्पट्टोदयशैलतुङ्गशिखरे मार्त्तण्डलक्ष्मीजुषः
सूरि श्रीविजयादिसिंहगुरवस्तेऽमी जयन्ति क्षितौ ॥४॥ इतश्च—
गच्छे स्वच्छतरे तेषां परिपाट्योपतस्थुषाम् ।
कवीनामनुभावेन नवीनां रचनां व्यधाम् ॥५॥ तथाहि—
येषां कीर्त्तिरिह प्रयाति जगदुत्सेकार्थमेकाकिनी
पाथोधेर्वडवानलाद् द्युसरितो भीता न शीतादपि ।
षट्तर्कश्रमसंभवस्तवरवख्यातप्रतापश्रियं
श्रीकल्याणविराजमानविजयास्ते वाचकास्तेनिरे ॥६॥
स्वप्रज्ञाविभवेन मेरुगिरिणा व्यालोडिताद् यत्नतो
हैमव्याकरणार्णवाज्जगति ये रत्नाधिकत्वं गताः ।
एते सिंहसमाः समग्रकुमतिस्तम्बेरमत्रासने
श्रीलाभाद्विजयाभिधानविबुधा दिव्यां श्रियं लेभिरे ॥७॥
दत्तः स्म प्रतिभां यदश्मन इव प्रोद्यत्प्रवालश्रियं
येषां मादृशबालिशस्य विलसत्कारुण्यसान्द्रे दृशौ ।
गीतार्थस्तुतजीतजीतविजयप्राज्ञोत्तमानां वयं
तत्तेषां भुवनत्रयादद्भुतगुणस्तोत्रं कियत्कुर्महे ॥८॥

જેમના ચાતુર્યથી ચમત્કાર પામેલા **ચિતોડનરેશે** ધર્મ અનુષ્ઠાનોના ઉત્સવોમાં **કુમારપાલની** તુલના કરી તે અને શ્રી દેવસૂરિ મહારાજની પાટ રૂપી ઉદયાચલ પર્વતના ઊંચા શિખર પર સૂર્ય જેવી શોભાવાળા એવા તે **શ્રી વિજયસિંહસૂરિ** મહારાજ પૃથ્વી પર જયવંતા વર્ત્તે છે. ॥૪॥

આ બાજુ, તેઓના સ્વચ્છતર ગચ્છમાં ક્રમશઃ ઉત્પન્ન થયેલા કવિઓના પ્રભાવથી મેં આ નવી રચના કરી. ॥૫॥ કવિઓની પરંપરા આ રીતે–

જગતને સીંચવા માટે જેઓની કીર્તિ સમુદ્રના વડવાનલથી કે આકાશ ગંગાની ઠંડીથી બીધા વગર એકાકિની વિચરે છે તે વાચક **શ્રી કલ્યાણવિજય** મહારાજે ષટ્ તર્ક (દર્શન) અંગે કરેલા શ્રમથી ઉત્પન્ન થયેલ સ્તવનના ધ્વનિથી પ્રસિદ્ધ થએલ પ્રતાપશ્રીને વિસ્તારી૦ ॥૬॥

સ્વપ્રજ્ઞાના વૈભવરૂપ મેરુ પર્વતથી પ્રયત્નપૂર્વક મંથન કરાએલા હૈમવ્યાકરણરૂપ સમુદ્રમાંથી પ્રાપ્ત કરેલ રત્નોના કારણે જેઓ રત્નાધિક બન્યા તે આ સમગ્ર કુમતરૂપ હાથીઓને ત્રાસ આપવામાં સિંહસમા **શ્રી લાભવિજય** નામના પંડિતે દિવ્ય શોભા પ્રાપ્ત કરી. ॥૭॥

જેઓની વિલસતી કરૂણાથી વ્યાપ્ત બે આંખોએ મારા જેવી બાલિશ વ્યક્તિરૂપ પત્થરને ચમકતા પ્રવાલની શોભારૂપ પ્રતિભા આપી તે, ગીતાર્થોથી સ્તવાએલ છે આચાર જેઓનો એવા પ્રાજ્ઞોત્તમ **શ્રી જીત વિજય** મહારાજના ત્રણે ભુવનમાં અદ્ભુત એવા ગુણોનું સ્તવન અમે કેટલું કરીએ? ॥૮॥

विप्रानात्मवशांश्चिरं परिचितां काशीं च बालानिव
क्षमापालानपि विद्विषो गतनयान् मित्राणि चाजीगणत् ।
मन्न्याय्याध्ययनार्थमात्रफलकं वात्सल्यमुल्लास्य ये
सेव्यन्ते हि मया नयादिविजयप्राज्ञाः प्रमोदेन ते ॥९॥
तेषां पादरजःप्रसादमसमं संप्राप्य चिन्तामणिं
जैनीं वाचमुपासितुं भवहरीं श्रेयस्करीमायतौ ।
यत्याचारविचारचारुचरितैरत्यर्थमभ्यर्थना-
देष न्यायविशारदेन यतिना ग्रन्थः सुखं निर्ममे ॥१०॥
यावद्धावति भास्करो घनतमोध्वंसी वियन्मण्डले ।
स्वर्गङ्गापुलिने मरालतुलनां यावच्च धत्ते विधुः ।
यावन्मेरुमहीधरोऽपि धरणीं धत्ते जगच्चित्रकृद्
ग्रन्थो नन्दतु तावदेष सुधियां खेलन् कराम्भोरुहे ॥११॥
ये ग्रन्थार्थविभावनादतितमां तुष्यन्ति ते सन्ततं
सन्तः सन्तु मयि प्रसन्नहृदयाः किं तैरहो दुर्जनैः ?
येषां चेतसि सूक्तसन्ततिपयःसिक्तेऽपि नूनं रसो
मध्याह्ने मरुभूमिकास्विव पयोलेशो न संवीक्ष्यते ॥१२॥

મારા ન્યાય અધ્યયનનું પ્રયોજન માત્ર છે ફળ જેનું એવું વાત્સલ્ય પ્રગટાવીને જેઓએ વિપ્રોને આત્મવશ કર્યા, (તદ્દન અપરિચિત એવી) કાશીને ચિરપરિચિત કરી રાજાઓને બાળક જેવા હઠીલા ગણી યથા યોગ્ય આચરણ કર્યું તેમજ ન્યાયનીતિ શૂન્ય એવા ઉદ્દમ શત્રુઓને પણ મિત્ર ગણી (તેઓની સાથે મિત્રની જેમ વર્તી) મારા અધ્યયન કાર્યને સાધ્યું તે પ્રાજ્ઞ **શ્રી નયવિજય** મહારાજ હંમેશા મારા વડે પ્રમોદ પૂર્વક ઉપાસના કરાય છે. ॥૯॥

સંસારનાશક અને ભવિષ્યમાં હિતકર એવી જિનવાણીની ઉપાસના કરવા માટે તેઓના ચરણરજની ચિન્તામણિ સમાન અજોડ કૃપાને મેળવીને, સાધુ સંબંધી આચાર-વિચારોથી પવિત્ર છે આચરણ જેઓનું એવા સાધુઓએ અત્યંત પ્રાર્થના કરી હોવાથી **ન્યાયવિશારદ સાધુ (શ્રી યશોવિજય મહારાજ)** વડે આ ગ્રન્થ સુખપૂર્વક રચાયો. ॥૧૦॥

ગાઢ અંધકારનો નાશ કરનાર સૂર્ય જ્યાં સુધી નભોમંડલમાં ફરે છે (ફરશે) અને જ્યાં સુધી ચંદ્ર આકાશ ગંગાના કિનારા પર હંસની તુલના કરે છે (કરશે) તેમજ જ્યાં સુધી મેરૂપર્વત પૃથ્વીને ધારણ (કરશે) ત્યાં સુધી જગતને આશ્ચર્ય પમાડનાર આ ગ્રન્થ સદ્બુદ્ધિવાળા પંડિતોના કમલમાં ખેલતાં ખેલતાં આનંદ પામો૦ ॥૧૧॥

ગ્રન્થાર્થની સૂક્ષ્મવિચારણાથી જેઓ અત્યંત તુષ્ટ થાય છે તે સજ્જનો હંમેશા મારા પર પ્રસન્ન ચિત્તવાળા થાઓ. અહો ! તે દુર્જનોથી સર્યું ! સુભાષિતોની પરંપરારૂપી પાણીથી સીંચાયેલા પણ જેઓના ચિત્તમાં, મરૂભૂમિમાં જેમ મધ્યાહ્ને પાણીનો

किमु खिद्यसे खल ! वृथा खलता किं फलवती क्वचिद्दृष्टा ?
परनिन्दापानीयैः पूरयसि किमालवालमिह ? ॥१३॥

जानाति मत्कृतस्य हि विद्वान् ग्रन्थस्य कमपि रसमस्य ।
नलिनीवनमकरन्दास्वादं वेद भ्रमर एव ॥१४॥

दुर्जनवचनशतैरपि चेतोऽस्माकं न तापमावहति ।
तन्नूनमियत्क्रियदपि सरस्वतीसेवनस्य फलम् ॥१५॥

ग्रन्थेभ्यः सुकरो ग्रन्थो मूढा इत्यवजानते ।
न जानते तु रचनां घूका इव रविश्रियम् । ॥१६॥

दुर्जनगीर्भ्यो भयतो रसिका न ग्रन्थकरणमुज्झन्ति ।
यूकापरिभवभयतस्त्यज्यन्ति के नाम परिधानम् ? ॥१७॥

उपेक्ष्य दुर्जनभयं कृताद् ग्रन्थादतो मम ।
बोधिपीयूषवृष्टिर्मे भवताद् भवतापहृत् ॥१८॥

॥ इति न्यायविशारदविरचितं सामाचारीप्रकरणं संपूर्णम् ॥

છાંટો પણ જોવા મળતો નથી તેમ ગ્રન્થ અંગેનો રસ ઊભો થતો નથી. ॥ ૧૨ ॥

હે દુર્જન ! વૃથા શા માટે ખેદ કરે છે. શું ખલતાને કયાંય ફળવાન બનેલી દેખી ? તેથી પારકાની નિંદા રૂપ પાણીથી અહીં કયારાઓ શા માટે પૂરે છે ? ॥૧૩॥

મેં કરેલા ગ્રન્થના કોઇક અપૂર્વ રસને વિદ્વાન જ જાણી શકે છે. નલિનીવનના મકરન્દનો આસ્વાદ ભ્રમર જ માની શકે છે. ઊંટ નહિ. ॥ ૧૪ ॥

દુર્જનના સેંકડો વચનોથી પણ અમારું ચિત્ત જે સંતાપ પામતું નથી તે ખરેખર સરસ્વતીની અત્યાર સુધી કરેલી ઉપાસનાનું કંઈક ફળ છે. ॥ ૧૫ ॥

'જુદા જુદા ગ્રન્થોમાંથી થોડું થોડું લઈને નવો ગ્રન્થ રચી દેવો સુકર છે' એવું વિચારીને મૂઢજીવો આની અવજ્ઞા કરે છે. ખરેખર! ઘુવડો જેમ સૂર્યની શોભાને જાણી શકતા નથી, તેમ તેઓ ગ્રન્થરચનાને જાણી શકતા નથી. ॥ ૧૬ ॥

દુર્જનો નિંદાવચનો બોલશે એવા ભયથી રસિકપુરુષો કંઈ ગ્રન્થ રચનાને પડતી મૂકતા નથી. 'જૂ થઇ જશે' એવા ભયના કારણે વસ્ત્ર પહેરવાનું કોણ છોડી દે છે? ॥ ૧૭ ॥

તેથી દુર્જનના ભયની ઉપેક્ષા કરીને કરાએલા આ મારા ગ્રન્થથી મારા સંસારના તાપને હરનાર બોધિરૂપ પીયૂષની વૃષ્ટિ થાઓ. ॥ ૧૮ ॥

॥ આમ ન્યાય વિશારદ મહામહોપાધ્યાય શ્રીમદ્ યશોવિજય મહારાજે રચેલું સામાચારીપ્રકરણ પૂર્ણ થયું. ॥

સાથે સાથે,

કર્મસાહિત્ય નિષ્ણાત સિદ્ધાંતમહોદધિ સ્વ. આ. ભગ. શ્રીમદ્ વિજય **પ્રેમ-સૂરીશ્વરજીમહારાજના** પટ્ટાલંકાર વર્ધમાનતપોનિધિ ન્યાયશાસ્ત્રનિપુણમતિ આ. ભગ. શ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજના શિષ્યરત્ન બંધવિહાણ મહાગ્રન્થ સર્જનના એક આધારસ્તંભ પ. પૂ. પંન્યાસપવર **શ્રી ધર્મજિત્ વિજયગણિવરના** શિષ્યરત્ન ભગવદ્ભક્તિરસિક પ. પૂ. પંન્યાસપ્રવર **શ્રી જયશેખર** વિજયગણિવરના શિષ્યાણુ મુનિ **અભયશેખર** વિજયે આ **સામાચારી પ્રકરણ** ગ્રન્થનો કરેલો **ભાવાનુવાદ** સાનંદ સંપૂર્ણ થયેા. [વિ. સં. ૨૦૪૨]



अर्हम् ।

श्रीशङ्खेश्वरपार्श्वनाथाय नमः ।

श्रीप्रेमभुवनभानुसूरीश्वरपन्न्यासधर्मजित्जयशेखरविजयगणिवरेभ्यो नमः ।

न्याय विशारद न्यायाचार्य महामहोपाध्याय यशोविजयकृता

आराधक-विराधक चतुर्भङ्गी

श्रुतशीलव्यपेक्षायामाराधकविराधकौ ।
प्रत्येकसमुदायाभ्यां चतुर्भङ्गीं श्रितौ श्रुतौ ॥१॥

ऐँ नमः । श्रुतं=श्रुतज्ञानं शीलं=मार्गानुसारिक्रियालक्षणं ब्रह्म, तयोर्व्यपेक्षायां=मिथःसङ्गत्या विशिष्टायामपेक्षायां विवेचनीयायां आराधकविराधकौ पुरुषौ प्रत्येकसमुदायाभ्यां=मिलिताऽमिलितभावाऽभावाभ्यां चतुर्भङ्गीं श्रितौ=भङ्गचतुष्टयापन्नौ श्रुतौ, [1]भगवत्यादौ । तथाहि एकः शीलवानश्रुतवानुपरतोऽविज्ञातधर्मा च, स्वबुद्ध्या पापान्निवृत्तेर्भावतोऽनधिगतश्रुतज्ञानत्वाच्चायं

શ્રુતજ્ઞાન અને માર્ગાનુસારી ક્રિયાત્મક બ્રહ્મરૂપશીલ એ બેની * પરસ્પર સંબંધવાળી વિશિષ્ટ અપેક્ષાપૂર્વક વિવેચન કરીએ તો જણાય છે કે આરાધક-વિરાધક પુરુષો પ્રત્યેક શ્રુત-શીલ અને તે બેના સમુદાય ને આશ્રીને (શ્રુત-શીલ પ્રત્યેકની મિલિત=ભેગી હાજરી, અમિલિત=સ્વતંત્ર એક એકની હાજરી અને બન્નેના અભાવને આશ્રીને) ચાર ભાંગા ધરાવે છે. એવું **શ્રી ભગવતીજી** સૂત્ર આદિમાં કહ્યું છે. તે આ રીતે-(૧) શીલવાન્-અશ્રુતવાન્...આ પોતાની બુદ્ધિ મુજબ પાપથી અટકેલો હોવાથી ઉપરત હોય છે, તેમજ ભાવથી શ્રુતજ્ઞાન પામેલો ન હોવાથી અવિજ્ઞાતધર્મા(=ધર્મનો અજાણ) હોય છે. આ ભાંગામાં બાળતપસ્વી આવે છે એવું કેટલાક આચાર્યો કહે છે, જ્યારે બીજા કેટલાક આચાર્યો એમ કહે છે કે ગીતાર્થની નિશ્રા વગર જ તપ-ચારિત્રમાં રત બનેલ અગીતાર્થ જીવ આ ભાંગામાં આવે છે. આ ભાંગાવાળો જીવ સમ્યગ્ બોધ શૂન્ય હોવાથી અને તેમ છતાં ક્રિયાતત્પર હોવાથી મોક્ષમાર્ગના અલ્પઅંશની આરાધના કરતો હોય છે. તેથી **દેશઆરાધક** કહેવાય છે.

---

१ भगवतीसूत्रम् (श० ८ उ० १०) एवं खलु मए चत्तारि पुरिसजाया पण्णत्ता । तं जहा-१ सीलसंपन्ने एगे णो सुअसंपन्ने । २. सुअसंपन्ने णामं एगे णो सीलसंपन्ने । ३. एगे सीलसंपन्ने वि सुअसंपन्ने वि । ४. एगे णो सीलसंपन्ने णो सुअसंपन्ने ॥ तत्थ णं जे से पढमे पुरिसजाए से णं पुरिसे सीलवं असुअवं, उवरए अविण्णायधम्मे । एस णं गोअमा । मए पुरिसे देसाराहए पण्णत्ते ? । तत्थ णं जे से दुच्चे पुरिसजाए से णं पुरिसे असीलवं सुअवं अणुवरए विण्णायधम्मे । एस णं गोअमा ! मए पुरिसे देसविराहए पण्णत्ते २ । तत्थ णं जे से तच्चे पुरिसजाए से णं पुरिसे सीलवं सुअवं, उवरए विण्णायधम्मे । एस णं गोअमा ! मए पुरिसे सव्वाराहए पण्णत्ते ३ । तत्थ णं जे से चउत्थे पुरिसजाए से णं पुरिसे असीलवं, असुअवं अणुवरए अविण्णायधम्मे । एस णं गोयमा मए पुरिसे सव्वविराहए पण्णत्तेत्ति ४ ॥

* પરસ્પર સંબંધવાળી વિશિષ્ટ અપેક્ષાપૂર્વક વિવેચન એટલે શ્રુત અને શીલ આ બન્નેને દૃષ્ટિ સમક્ષ રાખીને કોણ કેટલે અંશે આરાધક કે વિરાધક-એની વિચારણા.

बालतपस्वीत्येके, गीतार्थाऽनिश्रिततपश्चरणरतोऽगीतार्थ इत्यन्ये । सम्यग्बोधरहितत्वात् क्रियापरत्वाच्च स्तोकस्य मोक्षमार्गस्याराधनादेशाराधकश्चायमुच्यते १ । अन्यः श्रुतवानशीलवान् अनुपरतो विज्ञातधर्माऽविरतसम्यग्दृष्टिरिति यावत् । अयं च देशविराधकः-देशं स्तोकमंशं ज्ञानादित्रयस्य मोक्षमार्गस्य तृतीयविभागरूपं चारित्रं विराधयतीत्यर्थः, प्राप्तस्य तस्याऽपालनादप्राप्तेर्वा २ । इतरः शीलवान् श्रुतवानुपरतो विज्ञातधर्मा, स च सर्वाराधकः, संपूर्णमोक्षमार्गाराधनात् ३ । अपरश्चाशीलवानश्रुतवाननुपरतोऽविज्ञातधर्मा, स च सर्वविराधकः, मोक्षमार्गस्य लेशेनाप्यनाराधनात् ४ । इति संप्रदायः ॥१॥

अत्र केचित्—"यदनुष्ठानाऽकरणेन जिनाज्ञाया विराधकत्वं तदनुष्ठानकरणेनैव जिनाज्ञाया आराधकत्वमिति नियमादनुष्ठानान्तरकरणाऽकरणाभ्यां जिनाज्ञाराधनविराधनयोरभावाद्, अन्यथा परमार्गानुष्ठानत्याजनेन जैनमार्गानुष्ठानव्यवस्थापनाऽन्याय्यत्वप्रसङ्गात् । इत्थं परेषां विराधकत्वापादनादेशाराधकस्थलोदाहृतबालतपस्वी कुतश्चिन्निमित्तादङ्गीकृतजिनोक्तसाधुसामाचारीपरि-

(૨) શ્રુતવાન્-અશીલવાન્ અર્થાત્ ધર્મને ભાવથી જાણેલો હોવા છતાં પાપથી નહિ અટકેલ જીવ...અવિરત સમ્યગ્દૃષ્ટિજીવ આ ભાંગામાં આવે છે. આ જીવ જ્ઞાન-દર્શન-ચારિત્રરૂપ મોક્ષમાર્ગના ત્રીજા વિભાગ રૂપ ચારિત્રાત્મક એક દેશને વિરાધતો હોવાથી **દેશવિરાધક** કહેવાય છે. પ્રાપ્તચારિત્રનું પાલન કરતો ન હોવાથી કે ચારિત્રની પ્રાપ્તિ જ થઇ ન હોવાથી આ જીવ ચારિત્રનો વિરાધક હોય છે.

(૩) શીલવાન્-શ્રુતવાન્-પાપોથી અટકેલ એવો ભાવથી ધર્મનો જાણકાર જીવ. આ સંપૂર્ણ મોક્ષમાર્ગની આરાધના કરતો હોવાથી **સર્વઆરાધક** કહેવાય છે.

(૪) અશીલવાન્-અશ્રુતવાન્ પાપોથી નહિ અટકેલો ધર્મનો અજાણ જીવ...મોક્ષમાર્ગના અંશમાત્રની પણ આરાધના કરતો ન હોવાથી આ **સર્વવિરાધક** કહેવાય છે.

આ ચતુર્ભંગીની આવી સમજણ આચાર્યોની પરંપરાથી ચાલી આવેલ છે. ॥૧॥

[સાધુસામાચારીપાલક દ્રવ્યલિંગી દેશઆરાધક-પૂ૦]

આ ચતુર્ભંગીના પ્રથમ ભાંગા અંગે કેટલાકની માન્યતા એવી છે કે—

પૂર્વપક્ષ :-'જે અનુષ્ઠાન ન કરવામાં જિનાજ્ઞાના વિરાધક બનાય છે તે અનુષ્ઠાન કરવાથી જ જિનાજ્ઞાના આરાધક બનાય છે' એવો નિયમ હોવાથી બીજા અનુષ્ઠાનો કરવા-ન કરવા પર જિનાજ્ઞાની આરાધના-વિરાધના ઊભી નથી. અર્થાત્ ચતુર્ભંગીના બીજા ભાંગામાં જિનોક્ત ચારિત્ર (સાધુસામાચારી)નું પાલન ન હોવાથી જો વિરાધના કહી છે તો પહેલા ભાંગામાં તેના જ પાલનના કારણે (દેશથી) આરાધના કહી શકાય, અન્ય તાપસાદિ સંબંધી અનુષ્ઠાનોના પાલનથી નહિ... નહિતર તો (એટલે કે જો તાપસાદિ સંબંધી અનુષ્ઠાનોથી પણ જિનાજ્ઞાની આરાધના થઇ જતી હોય તો) જેઓ ભાવથી જૈનધર્મ પામી ગયા છે અથવા જૈનધર્મને અભિમુખ થએલા છે તે તાપસાદિને તેઓના અનુષ્ઠાનો છોડાવી જૈનધર્માનુસારી અનુષ્ઠાનોમાં જોડવાની આવશ્યકતા જ ન રહેવાથી તેઓને એ રીતે જોડવા અન્યાય્ય=અન્યાયપૂર્ણ બની જાય...માટે સાધુસમાચારી શૂન્ય બધા જીવોને જો વિરાધક કહ્યા છે તો આરાધક તરીકે સાધુસામાચારીયુક્ત જીવ

पालनपरायण एव गृह्यते मिथ्यादृष्टिः, जिनोक्तसाधुसामाचारीपरिपालनमन्तरेणाराधकत्वाभावान्मिथ्यादृष्टित्वमन्तरेण च बालतपस्वित्वाभावात्, न चैवं मतद्वयाऽभेदः, गीतार्थनिश्रितस्य गीतार्थस्य च द्रव्यलिङ्गिनो बालतपस्विनः संभवात्" इत्यभिमन्यन्ते तन्मतनिरासार्थमाह—

द्रव्याज्ञाऽऽराधनादत्र देशाराधक इष्यते ।
सामाचारी तु साधूनां तन्त्रमत्र न केवलम् ॥ २ ॥

द्रव्याज्ञेति । अत्र=प्रकृतचतुर्भङ्ग्यां द्रव्या(ज्ञा)राधनाद् देशाराधक इष्यते । द्रव्यपदं चात्र भावकारणार्थकं द्रष्टव्यं न त्वप्रधानार्थकम्, फलोपधायकसमुदायनिष्पादकावयवस्यैव देश-

---

જ લઈ શકાય... તેથી દેશ આરાધક જીવના ઉદાહરણ તરીકે જે બાળતપસ્વી કહ્યો છે તે દિવ્યસમૃદ્ધિ વગેરેની લાલસા વગેરે રૂપ કોઇ કારણે સાધુપણું લઈ જિનોક્ત સાધુસમાચારીના પરિપાલનમાં તત્પર રહેનાર મિથ્યાદૃષ્ટિ જીવ જ સમજવો. મિત્રાદિ દૃષ્ટિવાળો અને વેદવગેરેમાં કહેલા અનુષ્ઠાનો કરનાર માર્ગાનુસારી જીવ વગેરે નહિ, કેમ કે તેઓને જિનોક્ત સાધુસામાચારીનું પરિપાલન હોતું નથી અને જે પંચાગ્નિ તપ વગેરે અનુષ્ઠાનો હોય છે તેના પર જિનાજ્ઞાની આરાધના ઊભી નથી. માટે તેઓમાં આરાધકત્વ હોતું નથી, જ્યારે ઉક્ત મિથ્યાદૃષ્ટિમાં જિનોક્ત અનુષ્ઠાન હાજર હોઈ આરાધકત્વ છે તેમજ મિથ્યાદૃષ્ટિપણાના કારણે બાળતપસ્વીપણું પણ છે. માટે તેમાં ઉદાહરણ તરીકે જે બાળતપસ્વી કહ્યો છે તે દ્રવ્યલિંગી મિથ્યાત્વી જ લેવો જોઇએ.

શંકા :–પહેલા ભાંગાના ઉદાહરણમાં બે મત દેખાડયા છે. એમાં પહેલાં ઉદાહરણભૂત બાળતપસ્વી તરીકે પણ જો આવો સાધુવેશધારી જીવ જ લેવાનો હોય તો બે મત જુદા રહેશે જ નહિ, કારણ કે એ દ્રવ્યલિંગી પોતે ગીતાર્થની નિશ્રાશૂન્ય અગીતાર્થ જ છે અને એને તો બીજા મતના ઉદાહરણ તરીકે કહેવાએલો છે.

સમાધાન :–દ્રવ્યલિંગી બાળતપસ્વી ગીતાર્થ અનિશ્રિત અગીતાર્થ જ હોય એવો નિયમ નથી. ગીતાર્થ નિશ્રિત સાધુ કે ખુદ ગીતાર્થ સાધુ પણ દ્રવ્યલિંગી બાળતપસ્વી હોઈ શકે છે. તેથી પહેલા મતના ઉદાહરણ તરીકે તેવા ગીતાર્થનિશ્રિત કે ગીતાર્થ સંભવે છે જ્યારે બીજા મતના ઉદાહરણ તરીકે ગીતાર્થ અનિશ્રિત અગીતાર્થ જ સંભવે છે. તેથી બે મત જુદા હોવા સ્પષ્ટ છે. તેથી બાળતપસ્વી તરીકે ઉક્ત દ્રવ્યલિંગી જ લેવો જોઇએ.

આવા પૂર્વપક્ષનું નિરાકરણ કરવા ગ્રન્થકાર કહે છે—

[દેશઆરાધકપણામાં દ્રવ્યાજ્ઞાની આરાધના નિયામક–ઉ.]

આ પ્રસ્તુત ચતુર્ભંગીમાં જે આરાધનાની અપેક્ષાએ દેશ આરાધક કહ્યો છે તે દ્રવ્યાજ્ઞાની આરાધના છે. એમાં પણ જે 'દ્રવ્ય' પદ છે તે ભાવના કારણભૂત દ્રવ્યક્રિયાને જણાવનાર જાણવું. યોગ્ય ભાવ વિના કરાએલું અનુષ્ઠાન દ્રવ્ય આરાધના બને છે. આ દ્રવ્યઆરાધના જો ભાવ આરાધનાનું કારણ બનતી હોય તો પ્રધાન દ્રવ્ય આરાધના કહેવાય છે અને જો ભાવ આરાધનાનું કારણ બનતી ન હોય તો અપ્રધાન દ્રવ્ય આરાધના કહેવાય છે. અહીં પ્રધાન દ્રવ્ય આરાધના જ 'દેશ આરાધક' વ્યપદેશને પાત્ર

पदार्थत्वाद्, अप्रधानसहस्रस्य समुदायाऽनिष्पादकत्वात् । व्यवहाराभासेनाप्रधानद्रव्यक्रियाया[1] मार्गदेशत्वाभिमानेऽपि शीलश्रुतान्यतरश्रेयस्त्वप्रश्नोत्तरावसरे तदुपादानस्याऽन्याय्यत्वात् । साधूनां सामाचारी त्वत्र प्रकृतदेशाराधकत्वे केवलं न तन्त्रं, श्रावकाणामनाराधकत्वप्रसङ्गात् । ननु तेषामाराधकत्वेऽपि[2] सर्वाराधकत्वं स्यादिति चेत् ? स्यादेव श्रुतशीलदेशापेक्षया, शीलरूपदेश-प्रभेदापेक्षया[3] तु न स्यादिति किं नश्छिद्यते ?

ननु जिनोक्तानुष्ठानस्य देशाराधकतायां तन्त्रत्वे प्रणिगद्यमाने को दोषः ? इति चेत् ? न कोऽपि दोषः, केवलं द्रव्यलिंगवतामेव तथात्वमिति वृथा कदाग्रहः, मित्रादिदृष्टिमतामवेद्य-

---

જાણવી, કેમ કે, ફલોપધાયક (ફળ લાવી આપનાર) સમુદાયને ઉપસ્થિત કરી આપનાર અવયવ જ 'દેશ' છે...અને એવો અવયવ તો પ્રધાનદ્રવ્ય આરાધના જ છે. અપ્રધાન દ્રવ્ય આરાધનાઓ તો હજારો ભેગી થાય તો પણ વિશિષ્ટ કર્મનિર્જરાત્મક ફળ લાવી આપનાર ભાવ આરાધના સ્વરૂપ સમુદાયને એ ભેગો કરી આપી શકતી નથી. તેથી ખરો (શુદ્ધ) વ્યવહારનય તો તેવી અપ્રધાન દ્રવ્યક્રિયાને માર્ગના 'દેશ' (એક ભાગ) રૂપ પણ માનતો જ નથી. વ્યવહાર જેવા જણાતા અભિપ્રાય રૂપ વ્યવહારાભાસ નય અપ્રધાન દ્રવ્યક્રિયાને માર્ગના દેશ રૂપ માનવાનું અભિમાન રાખે છે પણ એટલા માત્રથી કંઇ એ દેશ આરાધના રૂપ બની જતી નથી. કેમ કે એ કલ્યાણરૂપ જ ન હોવાથી શીલ–શ્રુતના કલ્યાણપણાની વિચારણામાં શીલ તરીકે એની વાત કરવી એ અત્યન્ત અન્યાય્ય બની જાય છે. અર્થાત્ શ્રી ભગવતીજી સૂત્ર આદિમાં જ્યાં શીલ–શ્રુતના કલ્યાણપણાની વિચારણા છે, ત્યાં દેશ આરાધકના શીલ તરીકે કલ્યાણભૂત નહિ એવી અપ્રધાન દ્રવ્યક્રિયા કહેવી એ સાવ અસંગત છે. તમે કહેલ મિથ્યાત્વી દ્રવ્યલિંગીની સાધુમાચારીપાલનાદિ રૂપ ક્રિયા અપ્રધાન દ્રવ્ય આરાધના સ્વરૂપ હોઈ તે બાળતપસ્વીને દેશઆરાધક બનાવી શકતી નથી.

વળી આ દેશ આરાધકતામાં માત્ર સાધુસામાચારી જ નિયામક છે એવું નથી, કેમ કે એવું હોવામાં તો શ્રાવકો તે સામાચારી વિનાના હોઈ અનારાધક જ બની જવાની આપત્તિ આવે!

શંકા–શ્રાવકો અનારાધક બની જાય એમાં આપત્તિ જેવું છે શું ? કેમ કે તેઓના અનુષ્ઠાનોને શીલ રૂપ આરાધના માનીને જો તેઓને પણ આરાધક માનવાના હોય તો તો તેઓ પણ સર્વઆરાધક જ બની જાય, કેમ કે સમ્યગ્બોધ તો તેઓને પણ હાજર હોઇ તેઓ પણ શ્રુતવાન્–શીલવાન્ બની જાય છે. આ સર્વ આરાધકત્વની આપત્તિ ન આવે એ માટે તેઓમાં 'શીલ' રૂપ અંશની ગેરહાજરી માનવી આવશ્યક છે અને તેથી તેઓ અનારાધક બની જવામાં કોઈ આપત્તિ નથી.

સમાધાન–શ્રાવકો પણ શ્રુત અને શીલના એક દેશની અપેક્ષાએ સર્વ આરાધક છે જ...અર્થાત્ શ્રુત અને શીલદેશ રૂપ બન્ને અવયવો હાજર હોવાથી તેઓમાં સર્વ-આરાધકત્વ હોવામાં અમારે કોઇ અનિષ્ટ નથી. તેમ છતાં શ્રુત–શીલ ઉભયાત્મક સમુદાયના એકદેશ–રૂપ શીલના પેટા ભેદની અપેક્ષાએ, તેઓમાં સ્થાવરજીવોની અહિંસા વગેરે રૂપ શીલદેશ ન હોવાના કારણે પણ સંપૂર્ણશીલ હાજર ન હોવાથી સર્વ આરા-

संवेद्यपदस्थानामप्यपुनर्बन्धकाद्युचिततत्तत्तन्त्रोक्तक्रियाकारिणां विनिवृत्तकुतर्कग्रहाणां मार्गानुसारिणामध्यात्मभावनारूपस्य व्यवहारतस्तात्त्विकस्य कुलयोग्याद्युचितानुष्ठानस्य—

चित्रा तु देशनैतेषां स्याद् विनेयानुगुण्यतः । यस्मादेते महात्मानो भवव्याधिभिषग्वराः ॥ १३४ ॥

इत्यादिना ग्रन्थेन योगदृष्टिसमुच्चयादौ तत्त्वतो जिनोक्तत्वस्य सुप्रसिद्धत्वाद्, इति हरिभद्रग्रन्थाऽपरिचयविलसितमेतद् यद् भवाभिनन्दिनां ख्यातिलाभाद्यर्थिनां गृहीतद्रव्यलिङ्गानां सकृदावर्त्तनादिदूरतरभूमिभाजां देशाराधकत्वमनभिमतमङ्गीक्रियते, अतादृशां चाऽपुनर्बन्धकादीनां मित्रादिदृष्टिमतामभिमतं तन्नाङ्गीक्रियत इति । न च बालतपस्विपदेन द्रव्यलिङ्गी क्वचिदपि व्यपदि-

---

धકત્વ નથી પણ.

[ઇતરમાર્ગસ્થ અપુનર્બંધકાદિ પણ દેશઆરાધક]

પ્રશ્ન–દેશઆરાધના માટે જિનોક્ત અનુષ્ઠાનોને જ નિયામક કહેવામાં શું દોષ છે ?

ઉત્તર–કોઇ જ દોષ **નથી.** પણ માત્ર દ્રવ્યલિંગીઓમાં જ જિનોક્ત અનુષ્ઠાનો હોય છે અને તેથી તેઓ જ દેશ આરાધક છે, અનુપર્બંધકાદિ જીવો નહિ એવો તમારો આગ્રહ કદાગ્રહ રૂપ જ છે, કેમકે અપુનર્બંધકાદિ જીવોમાં પણ જિનોક્ત અનુષ્ઠાનો હોય જ છે. તે આ રીતે–જે જીવો મિત્રાદિ દૃષ્ટિવાળા છે, અવેદ્યસંવેદ્ય પદે રહેલા હોવા છતાં તે તે ઇતરશાસ્ત્રોમાં કહેલ અપુનર્બંધકાદિને ઉચિત ક્રિયા કરનારા છે, કુતર્કોની પકડ વિનાના છે, [૧]માર્ગાનુસારી છે તેઓના [૨]અધ્યાત્મ અને ભાવના સ્વરૂપ, [૩]વ્યવહારથી તાત્ત્વિક અને [૪]કુલયોગીઓને ઉચિત એવા અનુષ્ઠાનો તત્ત્વતઃ [૫]જિનોક્ત જ છે એવું **શ્રી યોગદૃષ્ટિ સમુચ્ચયાદિ** ગ્રંથમાં "અભિનિવેશ શુન્ય આ જીવો (તે તે દર્શનના આદ્ય સ્થાપકો)ની દેશના શિષ્યોને અનુસરીને વિચિત્ર હોય છે (છતાં તે તે ભૂમિકાએ આત્મહિતકર હોય છે અને તેથી જિનોક્ત જ હોય છે), કેમકે આ મહાત્માઓ સંસારરૂપ રોગના વૈદ્ય સમાન હોય છે" ઇત્યાદિ શ્લોક દ્વારા કહ્યું છે. તેથી જે જીવો ભવાભિનંદી છે, ખ્યાતિ આદિની ઇચ્છાથી દ્રવ્યલિંગને ધારણ કરે છે અને સકૃદ્બંધકાદિની ભૂમિકાથી પણ ઘણા દૂર રહેલા છે, તેઓમાં શાસ્ત્રકારોને અનભિમત એવું પણ દેશ આરાધકપણું હોવાની અને જેઓ તેવા નથી એવા મિત્રાદિદૃષ્ટિવાળા અપુનર્બંધકાદિજીવોમાં શાસ્ત્રકારોને અભિમત એવું પણ દેશ આરાધકત્વ ન હોવાની તમારી આ માન્યતા તો તમે **શ્રી હરિભદ્રસૂરિ** મહારાજના **યોગદૃષ્ટિ સમુચ્ચયાદિ** ગ્રન્થના સાવ અજાણ જ છો એ વાતને જ સૂચવે છે. વળી

---

૧. પ્રગતિ સાધક ક્ષયોપશમાનુસારી. ૨. યોગના આધ્યાત્મ, ભાવના, ધ્યાન, સમતા અને વૃત્તિસંક્ષેપ એ પાંચ ભેદોમાંના આદ્ય બે ભેદ...૩. નિશ્ચયનયથી તો ૬–૭ ગુણઠાણાના અનુષ્ઠાનો જ તાત્ત્વિક છે. માટે અહીં વ્યવહારનયથી એમ કહ્યું...૪. 'કુલ પરંપરામાં મળેલ છે' માત્ર એટલા જ કારણે પોતાને કુલ પરંપરામાં મળેલ અનુષ્ઠાનો જિનપૂજા–પંચાગ્નિ તપ વગેરે અનુષ્ઠાનો કરે તે કુલયોગી અને સમજ મળવાથી ઉપાદેય ભાવે કરે તે પ્રવૃત્તચક્ર. ૫. તેઓના જે માતા–પિતાને પ્રણામાદિ સદ્અનુષ્ઠાનો છે તે તો જિનોક્ત અને હિતાવહ છે જ, પણ બીજા ય જે ફરાળી ઉપવાસાદિ અનુષ્ઠાનો છે તે પણ કદાગ્રહનો અભાવ હોવાના કારણે તેમાંથી અસત્પણું નીકળી ગયું હોઈ હિતાવહ જ બને છે. જેમકે ૧૨મા ગુણઠાણાવાળાનો અસત્યમનોયોગ પણ કેવલજ્ઞાન લાવી આપે છે. માટે તેઓના તે અન્યવિધ અનુષ્ઠાનો પણ અર્થતઃ જિનોક્ત જ છે.

इयतेऽपीति यत्किञ्चिदेतद् । न चैवं शीलेन देशाराधकस्य सतो बालतपस्विनरतन्मार्गत्याजनेन जैनमार्गव्यवस्थापनाऽनुपपत्तिः, उत्कृष्टक्रियासंपत्तयेऽपकृष्टक्रियात्याजनेऽप्याराधकतमत्वस्य लोकशास्त्रसिद्धत्वात्, लोके क्षुद्रवाणिज्यपरित्यागेन रत्नवाणिज्यादरात्, शास्त्रे च स्थविरकल्पिकादिसामाचारीपरित्यागेन जिनकल्पादिसामाचार्यादरादिति ।

ननु यद्यपुनर्बन्धकादयोऽपि मार्गानुसारिक्रियारूपशीलेनान्यलिङ्गस्था अपि देशाराधका इष्यन्ते तर्हऽविरतसम्यग्दृष्टिरपि देशाराधकः सुतरां स्यात्, तस्यापि मार्गानुसारिक्रियायाः सुश्रूषादिरूपाया योगबिन्दुप्रसिद्धत्वादिति चेत् ? सत्यम्, स्थूलबोधवतां मित्रादिदृष्टिभाजां स्वोचितस्थूलक्रियायां शीलवत्त्वेऽप्यविरतसम्यग्दृशः सूक्ष्मबोधवतः स्वोचितलोकोत्तरसूक्ष्म-

---

'બાળતપસ્વી' શબ્દથી દ્રવ્યલિંગીનો કોઈ, શાસ્ત્રમાં ઉલ્લેખ કર્યો નથી. તેથી 'બાળતપસ્વી,' પદથી તેવા દ્રવ્યલિંગી લેવા યુક્ત નથી.

શંકા– આવા ઈતરશાસ્ત્રોક્ત અનુષ્ઠાનરૂપ શીલના કારણે જેઓ દેશ આરાધક બનેલા છે તેઓને તે અનુષ્ઠાનરૂપ માર્ગ છોડાવી જૈન માર્ગમાં જોડાવા અયોગ્ય બની જશે.

સમાધાન–તમારી શંકા બરાબર નથી, કેમકે 'ઉત્કૃષ્ટ ક્રિયાની પ્રાપ્તિ માટે અપકૃષ્ટક્રિયા છોડાવવામાં પણ ઊંચી આરાધના થાય છે' એ વાત લોકમાં અને શાસ્ત્રમાં પ્રસિદ્ધ છે. જેનાથી પોતાની આજીવિકા ચાલતી હોય એવા પણ ક્ષુદ્રવાણિજ્યનો રત્નના વેપાર માટે કરાતો ત્યાગ લોકમાં જોવા મળે છે, તેમજ શાસ્ત્રમાં પણ સ્થવિરકલ્પની સામાચારીનો ત્યાગ કરી જિનકલ્પાદિની સામાચારીનો આદર કરવાનું વિધાન છે.

[અવિરતસમ્યક્ત્વી દેશઆરાધક કેમ નહીં ?]

શંકા :–અપુનર્બંધકાદિ જીવો પણ અન્યલિંગમાં રહ્યા હોવા છતાં જો માર્ગાનુસારીક્રિયારૂપ શીલના કારણે દેશઆરાધક છે તો અવિરત સમ્યક્દૃષ્ટિ તો નિર્વિવાદ દેશ આરાધક બની જ જશે, કેમ કે શુશ્રૂષાદિરૂપ માર્ગાનુસારી ક્રિયાઓ એ પણ કરે છે એવું **યોગબિન્દુ** શાસ્ત્રમાં કહ્યું છે.

સમાધાન : તમારી વાત સાચી છે. તેઓ પણ એવી માર્ગાનુસારીક્રિયાઓ કરે જ છે. છતાં તેઓને જે સૂક્ષ્મબોધ પ્રાપ્ત થયો હોય છે તેની અપેક્ષાએ તેઓની એ ક્રિયાઓ સ્થૂલ હોવાથી લોકોત્તરસૂક્ષ્મશીલ તો તેઓમાં હોતું જ નથી. અર્થાત્ સ્વભૂમિકાને ઉચિત સૂક્ષ્મશીલ ન હોવાથી તેઓ દેશઆરાધક બનતા નથી. મિત્રાદિ દૃષ્ટિવાળા જીવોની ક્રિયાઓ પણ જો કે સ્થૂલ જ હોય છે છતાં તેઓને પ્રાપ્ત થયેલ સ્થૂલબોધની અપેક્ષાએ એ ક્રિયાઓ શીલરૂપ બને જ છે અને તેથી તેઓ દેશઆરાધક બને છે. તાત્પર્ય એ છે કે જેમ નાનો ૪–૫ વર્ષનો છોકરો જો કાગળની હોડી બનાવે તો એ એની હોંશિયારી ગણાય છે પણ વીશ વર્ષનો યુવાન્ એવી ચેષ્ટા કરે તો એ એની હોંશિયારી તો ન ગણાય પણ જડતા જ ગણાય છે, કારણ કે એની બુદ્ધિ વિકસેલી હોય છે. એમ અપુનર્બંધકાદિનો બોધ એટલો બધો વિકસેલ ન હોવાથી એની એ સ્થૂલક્રિયાઓ પણ શીલરૂપ બને છે જ્યારે અવિરત સમ્યગ્દૃષ્ટિનો બોધ એની અપેક્ષાએ ઘણો વિકસેલો

शीलाभावाद्, अन्यथा देशविरत्यादिगुणस्थानावाप्त्याऽविरतत्वव्याघातात् सुश्रूषादि क्रियायाश्च श्रुताङ्गतया तत्त्वतः श्रुतान्तर्भावेन शीलत्वेनाऽविवक्षणादकरणनियमोपकारिपापनिवृत्तेः शीलार्थत्वात् । अथ तथापि शीलवतोऽश्रुतवतो देशाराधकत्वं कथं, मित्रादिदृष्टिभाविनो द्रव्यशीलस्य तादृश-द्रव्यश्रुतनान्तरीयकत्वात् ? इति चेत् ? न, श्रुतशब्देनात्र भावश्रुतस्यैव शीलशब्देन च मार्गानु-सारिक्रियामात्रस्यैव ग्रहणात्, स्वतन्त्रपरिभाषाया अपर्यनुयोज्यत्वाद्, अन्यथा द्रव्यलिङ्गवताम-भव्यादीनामपि श्रुतप्राप्त्या सर्वाराधकतापत्तेः । अथ श्रुतापेक्षया देशाराधकत्वमशीलवतः श्रुतवतश्च किं न स्यात् ? इति चेत् ? तस्येह सतोऽप्यविवक्षणात् । द्वितीयव्रतनिर्वाहरूपस्य च तस्य तत्त्वतः शीलाराधकत्वपर्यवसितत्वादिति ॥ २ ॥

હોવાથી એની એ સ્થૂલક્રિયાઓ સ્વઉચિત લોકોત્તર શીલરૂપ બનતી નથી. આશય એ છે કે અવિરત સમ્યક્દૃષ્ટિ જીવો સર્વપાપોને પાપ રૂપે જાણે છે–છોડવા જેવા માને છે અને છતાં તેવો કર્મોદય, સત્ત્વની કચાશ, પરિસ્થિતિ વગેરેના કારણે એ બધાથી નિવૃત્ત થતા નથી. તેથી તેઓમાં શીલ હોતું નથી. જ્યારે આપુનર્બંધકાદિ અન્યલિંગસ્થ તે જીવો પોતે જેટલા પાપોને પાપ રૂપ જાણે છે તે બધાથી પ્રાયઃ દૂર રહે છે તેથી એનામાં શીલની હાજરી હોય છે. બાકી અવિરત સમ્યગ્ દૃષ્ટિ જીવ શુશ્રૂષાદિરૂપ જે અનુષ્ઠાનો કરે છે પોતાના બોધની અપેક્ષાએ અત્યંત અલ્પ એવા પણ તે અનુષ્ઠા-નોને શીલરૂપ માની લેવામાં આપત્તિ એ આવશે કે એને દેશવિરતિ ગુણસ્થાનકની જ પ્રાપ્તિ થઇ જવાથી તેઓનું અવિરતપણું જ ટળી જશે, કેમ કે શીલ પાપનિવૃત્તિરૂપ હોઇ શીલની હાજરીમાં આંશિક વિરતિ આવી જ જાય છે. વળી 'शुश्रूषा श्रवणं चैव...' ઇત્યાદિ શ્લોકથી જણાય છે કે શુશ્રૂષાદિ ક્રિયાઓ શ્રુતના અંગરૂપ જ છે. તેથી શ્રુતમાં અન્તર્ગત એવી તેની શીલરૂપે વિવક્ષા કરી નથી, કેમ કે અકરણ નિયમને પોષક એવી પાપનિવૃત્તિ જ શીલ છે. માટે શુશ્રૂષાદિને લઇને અવિરત સમ્યક્ત્વી જીવો દેશ–આરાધક બનતા નથી.

[ચતુર્ભંગીની પ્રરૂપણા સ્વતંત્રપરિભાષારૂપ છે]

શંકા–છતાં શીલવાન્–અશ્રુતવાન્ એવા મિત્રાદિદૃષ્ટિ યુક્ત જીવોમાં દેશઆરાધક-પણું શી રીતે સંભવે ? કેમ કે દ્રવ્યશીલ તેવા પ્રકારના વિશિષ્ટ દ્રવ્યશ્રુત વિના અસં-ભવિત હોઇ તેઓને પણ દ્રવ્યશ્રુત હોય તો છે જ...તેથી શ્રુત-શીલ ઉભયની હાજરી વાળા તેઓને દેશ આરાધક શી રીતે કહેવાય ?

સમાધાન–અહીં 'શ્રુત' શબ્દથી ભાવશ્રુત જ લેવાનું છે. તે અપુનર્બંધકાદિ જીવોને ભાવશ્રુત ન હોવાથી તેઓ દેશઆરાધક જ છે. વળી 'શીલ' શબ્દથી માત્ર માર્ગાનુસારીક્રિયા જ લેવાની છે. તેથી અપુનર્બંધકાદિને ભાવ આરાધના ન હોવા છતાં શીલ તો અક્ષત જ હોવાથી દેશઆરાધના હોવામાં બાધ નથી. તેમજ "આ ચતુ-ર્ભંગીમાં શ્રુત તરીકે જો ભાવશ્રુત લેવાનું છે તો શીલ તરીકે પણ ભાવઆરાધના જ કેમ નથી લીધી ?" એવો પ્રશ્ન કરવો નહિ, કેમ કે આ આરાધક–વિરાધકની પ્રરૂપણા

द्वितीयभङ्गमपि बालिशानां महतीं विप्रतिपत्तिमपाकर्तुं विवेचयति—

भग्नव्रतक्रियानात्तक्रियौ देशविराधकौ ।
क्रियाप्राधान्यमाश्रित्य ज्ञायेते परिभाषितौ ॥३॥

भग्नेति । व्रतं=प्राणातिपातविरमणादि, इच्छाप्रवृत्त्यादिक्रिया च संवेगपूर्वा तदनुगताचरणा, ततो भग्ने व्रतक्रिये येन स तथा, अनात्ता=अगृहीता क्रिया उपलक्षणाद् व्रतं च येन स तथा, भग्नव्रतक्रियश्चाऽनात्तव्रतक्रियश्च भग्नव्रत[क्रियानात्त]क्रियौ देशविराधकौ परिभाषितौ ज्ञायेते, प्राप्तस्य तस्याऽपालनाद् अप्राप्तेर्वेति व्यवस्थितविकल्पप्रदर्शनाद् भग्नव्रतक्रियस्य प्राप्ताऽपालनेनाऽनात्तव्रतक्रियस्य चाऽप्राप्त्यैव देशविराधकत्वव्यवस्थानात् । श्रुतवन्तमशीलवन्तमुद्दिश्य देशविराधकत्वविधानेनोद्देश्यविधेययोर्व्युत्पत्तिविशेषाद् व्याप्यव्यापकभावे लब्धे द्वितीयभङ्गे चाऽ-

---

સ્વતંત્ર પરિભાષા રૂપ હોઇ તેમાં આવું કેમ ? અને આવું કેમ નહિ ? ઇત્યાદિ પ્રશ્નોને અવકાશ નથી. માટે શ્રુત તરીકે તો ભાવશ્રુત જ લેવાનું છે નહિતર તો (એટલે કે શ્રુત તરીકે જો દ્રવ્યશ્રુત પણ ચાલતું હોય તો) દ્રવ્યલિંગી અભવ્યોને પણ સર્વ આરાધક માનવાની આપત્તિ આવે, કેમ કે તેઓમાં પણ દ્રવ્યશ્રુત તો હોય છે જ...

શંકા–અવિરતસમ્યક્દૃષ્ટિ વગેરેમાં સુશ્રુષાદિ હોવા છતાં સ્વઉચિત શીલ હોતું નથી એવું તમે કહ્યું તે જાણ્યું. છતાં તેઓમાં શ્રુત તો હોય જ છે. તેથી અશીલવાન્ શ્રુતવાન્ એવા તેઓ પણ શ્રુતની અપેક્ષાએ દેશઆરાધક શા માટે નહિ ?

સમાધાન— જ્ઞાન-ક્રિયા ઉભયસ્વરૂપ મોક્ષમાર્ગના એક દેશભૂત એવા શ્રુતની આરાધનાથી અવિરતસમ્યગ્દૃષ્ટિ વગેરેમાં જો કે દેશઆરાધકપણું હોય છે, તો પણ તેની અહીં વિવક્ષા કરી નથી. તેમાં કારણ આ પ્રમાણે જાણવું–અવિરતસમ્યક્ત્વી, સંવિગ્નપાક્ષિક વગેરે જેટલું પણ શ્રુત ધરાવતા હોય તેની તેઓએ યથાર્થ પ્રરૂપણા જ કરવાની હોય છે. એટલે કે પોતાનું આચરણ ભલે અર્થ/કામનું કે શિથિલતાનું હોય તો પણ તેઓએ અર્થ/કામને હેય તરીકે અને ઉદ્યતવિહારને જ સત્યમાર્ગ તરીકે કહેવા પડે છે. (હેય-ઉપાદેય વગેરેની જાણકારી હોવા છતાં) આ બાબતમાં તેઓ અસત્ય બોલે તો મિથ્યાત્વે જવાથી તેઓનું શ્રુત એ મિથ્યાશ્રુત (દ્રવ્યશ્રુત) બની જવાના કારણે શ્રુતની અપેક્ષાવાળું દેશઆરાધકપણું જળવાતું નથી, માટે આટલા અંશમાં સત્યવ્રતનો નિર્વાહ (અસત્યથી વિરમણ) એ જ તેઓનું શ્રુતની અપેક્ષાવળું દેશ આરાધકપણું બની જાય છે. આ દ્વિતીયવ્રતનો નિર્વાહ એ તો એક પ્રકારનું શીલ જ છે. તેથી દ્વિતીયવ્રતના નિર્વાહરૂપ તે આમ વાસ્તવિક રીતે શીલના આરાધકત્વમાં ફલિત થાય છે, માટે શ્રુતની અપેક્ષાએ પણ જો આરાધકત્વની વિવક્ષા કરવામાં આવે તો, તેનામાં શ્રુત તો છે જ. આ રીતે શીલ પણ આવી ગયું, એટલે સર્વ આરાધકપણું જ વિવક્ષવું પડે, પણ દેશઆરાધકપણું નહિ. ॥૨॥ બાલીશજીવોને થયેલી મોટી વિપ્રતિપત્તિને દૂર કરવા બીજા ભાંગાનું પણ વિવેચન કરતા ગ્રંથકાર કહે છે—

(ભગ્ન કે અગૃહીત વ્રતક્રિયાવાળો જીવ એ દેશવિરાધક)

જેઓએ ગૃહીત વ્રત-ક્રિયા ભાંગી નાખ્યા છે અથવા તો જેઓએ તેનું ગ્રહણ જ કર્યું નથી તેવા જીવોને ક્રિયાની પ્રધાનતા લક્ષીને શાસ્ત્રકારોએ દેશવિરાધક કહ્યા છે એવું જણાય છે. અહીં વ્રત પ્રાણાતિપાત વિરમણાદિ રૂપ છે અને ઇચ્છા-પ્રવૃત્તિ વગેરે ક્રિયા તે વ્રતને અનુકૂળ એવી સંવેગપૂર્વકની આચરણા રૂપ છે. આ બેને જેણે ભાંગી નાંખ્યા હોય તે ભગ્નવ્રતક્રિય કહેવાય અને જેણે આ બેનું ગ્રહણ જ કર્યું નથી તે

विरतसम्यग्दृष्टिरपि] "प्राप्तस्य तस्याऽपालनादिति वचनेन विरतिपरित्यागेनैव देशविराधको भणितः" इति वचनस्याऽज्ञानविलसितत्वात्, अनुपरतपदेन सूत्र एव विवृतस्याऽशीलवत्पदस्य समर्थनार्थं 'अप्राप्तेर्वा' इति विकल्पस्य वृत्तिकृताऽभिधानात् । इत्थं च–एवं चोभयोरपि प्रकारयोः सविषयत्वेन प्रामाण्ये सिद्धे यदप्राप्तेर्वेति विकल्पेन व्याख्यातं तत्केनाभिप्रायेणेति संशये सम्यग्वक्तृवचनं वयमपि श्रोतुकामाः स्म'–इति वदतोऽज्ञानान्धस्य सूक्ष्मदृशा पर्यालोचनाभिमानो न दिव्यदृशां विस्मयकारीति ध्येयम् ।

यत्त्वेवं केवल्यप्यप्राप्तजिनकल्पादेर्विराधकः प्रसज्येतेति वचनं तदसमीक्षिताभिधानं, प्राप्तिसामान्याभावस्यैवाऽप्राप्तिपदार्थत्वात्[1] । अतएव "परिभाषितौ" इति वचनाच्च न सम्यग्ज्ञा-

---

